संस्कृत-विमर्शः

(प्रथमोभागः १९८७)

प्रधान संपादकः

डॉ॰ मण्डन मिश्रः, निदेशकः

संपादकः

पं॰ श्री संपन्नारायणाचार्यः

न्यायमीमांसा, वेदान्त विद्वान्

उपनिदेशकः

राष्ट्रिय संस्कृत संस्थानम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृत - विमर्शः

(राष्ट्रिय संस्कृत संस्थानस्य षाण्मासिकी शोध पत्रिका)

पञ्चदशः खण्डः　　१९८७　　प्रथमोभागः

प्रधान सम्पादकः

डॉ मण्डन मिश्रः, निदेशकः

सम्पादकः

पं० श्री संपन्नारायणाचार्यः

न्यायमीमांसा, वेदान्त विद्वान्

उपनिदेशकः

राष्ट्रिय संस्कृत संस्थानम्

ए-40, विशाल इन्क्लेव, राजा गार्डन

नई दिल्ली-27

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः

डा. मण्डन मिश्रः, निदेशकः

राष्ट्रिय संस्कृत संस्थान
ए-४०, विशाल इन्क्लेव, राजा गार्डन
नई दिल्ली-२७

मुद्रकः

अमर प्रिंटिंग प्रेस
८/२५, विजय नगर, दिल्ली-९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयानुक्रमणिका

संस्कृतम्

१. वाक्चतुष्टयम्
डॉ बलजिन्नाथ पण्डितस्य १

२. किं सत्यं किं वाऽनृतम्
हिमांशु चक्रवर्ती ८

३. वेदार्थनिर्णयः
डॉ यज्ञवीर १५

४. न्यायवैशेषिकदर्शनानुसारेण सृष्टिनिरूपणम्
डॉ रामानुजताताचार्यः २४

५. व्याप्तिपञ्चकशतकोटिः
गब्बिट आञ्जनेय शास्त्री ३८

६. किं प्रयोगे विलुप्ता सरस्वती ? ८७

English

1. On the interdependence of Itivṛtta and Rasa
Dr. [Mrs.] M. V. Ramana 1

2. Trivarga and Kālidasa
Dr. S. R. Ivaturi 7

3. Aśmakeśvara Śarabha of Bāna an Appraisal
Dr. Sudarshan Kumar Sharma 12

4. Creativity and the Sanskrit Teacher
Dr. Rayan S. Peri, MA 25

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाक्चतुष्टयम्

डॉ. बलजिन्नाथ पण्डितस्य

श्री रणवीर केन्द्रीय संस्कृत विद्यापीठम्, जम्मू

वाक्चतुष्टयस्य स्वरूपं मनाक् प्रदर्श्यते काश्मीर शैवदर्शनस्य दृष्ट्या। तत्र व्युत्पत्त्यनुसारं वक्तीति वागितीन्द्रियविशेषस्याभिधानम्। तेनेन्द्रियेणोच्चार्यमाणस्य सार्थस्य ध्वन्यात्मकस्य शब्दप्रपञ्चस्यापि नाम वागिति। शब्दोऽसावर्थं बोधयितुमेव प्रयुज्यते। ततोऽर्थावबोधकस्य ध्वन्येतरस्यापि पदार्थस्य वागित्यभिधानम्। वांचा यः स्वयमर्थावबोधो यच्च तेन परस्यावबोधनं तदेव हि शब्दनम्। स्वावबोधमयं शब्दनं विकल्पज्ञानात्मकम्, विकल्पनं हि शब्दानुविद्धमेव। 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति तल्लक्षणात्। परस्यावबोधनमपि शब्देनैव तं प्रति प्रतिपादनम्। ततस्तदपि शब्दानुविद्धमेव। शब्दानुवेधं विना निजो वा विषयावबोधः परावबोधनमपि वा नैव सम्भवति। ततोऽविकल्पबोधसमनन्तरं बुद्धया तस्य वाग्विषयतापादनमेव हि स्वावबोधः। वाग्विषयतापादनमेव शब्दनं यज्ज्ञानात्मकस्यावबोधस्य जीवितम्।

शब्दनं च मूलतो विमर्शनमेव। यदेव हि जनः स्वसंविदा विमृशति तस्यैवावबोधस्तस्य सञ्ज़ायते। तदेव चासौ ध्वन्यात्मिकया वाचा परमवबोधयितुं यतते। ततः स्वावबोधे वा परावबोधने वा सर्वत्र शब्दनं मूलतो विमर्शात्मकम्। इयं विमर्शात्मकतैव ज्ञानरूपस्यावबोधस्य जीवितम्। तद्विना तस्य काष्ठकुड्यादिवद् विसंज्ञत्वं प्रतिपादितं पूर्वगुरुभिः। सद्योजातस्य बालस्य यः क्षुत्पिपासादेरान्तरोऽवभासोऽसौ तस्यान्तर्नूनं प्रकाशतएव। न केवलं प्रकाशत एव, यावत्तेन विमृश्यतेऽपि, यदस्ति मेऽन्तः किमप्यपेक्षित-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मिति । एष तस्य स्वावबोधो यो नूनं विमर्शमयः । एवम्भूतं विशेषसाङ्केतिकशब्दसाहाय्यरहितमस्फुटमान्तरापेक्षाविमर्शमेव बहिर्विवरीतुमसौ बालः क्रोशति । तेन विमर्श एवात्र शब्दनक्रियायाः मौलिकं स्वरूपं, बीजकल्पं वा । परत्र स्वान्तः स्थितस्य विमर्शस्योत्पादनायैव बालो वा प्रौढोऽपि वा शब्दमुच्चारयति । इत्थं सर्वत्र विमर्श एव वाचोऽन्तरतमं तत्त्वम् ।

प्रौढव्यवहारेऽपि यदेव यथैवं निर्विकल्पतया संविदितं भवति, तदेव तथैव तत्र विमृष्टं भवति । अन्यथा तस्यावभासनमेव नाभविष्यत् । तत्र निर्विकल्पे यद् विमर्शनं तदसाङ्केतिकैरेवाङ्गुलिनिर्देशकल्पैर्वाचः सूक्ष्मतरैः स्वरूपैः सम्भिन्नं सद्विमृष्टं भवति । अतएव नैयायिका अपि निर्विकलपज्ञानेन घटघटत्वयोः परस्पर वैशिष्ट्यामवगाहि स्वरूपं विमृष्टं मन्यन्ते । निर्विमर्शस्तु नैव कश्चनापि बोधरूपोऽवभासः । प्रमातुः स्वात्मनः प्रकाशो योऽहमिति, सोऽपि विमर्शात्मक एव सन् प्रकाशते । निर्विमर्शस्य प्रकाशस्य, जलदर्पणादिगतप्रतिबिम्बप्रतिफलनमात्रकलपतया जडत्वमेव । चेतनस्य प्रमातृप्रकाशस्यायमेव विशेषो यत् पूर्वं स्वात्मानं विमृशन्नास्तेऽहमिति, ततः स्वात्मनि प्रतिबिम्बितं घटादि सुखादि च विमृशतीदमिति । अनेनैवाभिप्रायेणोक्तमीश्वरप्रत्यभिज्ञायामाचार्योत्पलदेवपादैः—

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः ॥

(ई. प्र. १-५-११)

अनेनैतत् स्पष्टीकृतं भवति—यदेव केनापि स्वात्मप्रकाशभित्तौ संलग्नतया विमृश्यते, तदेवाभाति तस्य निर्विकल्पके ज्ञाने । यदेव केनापि निर्विकल्पेन ज्ञानेन विमृश्यतेऽस्फुटं, तदेव तेन निश्चीयते स्फुटेन सविकल्पकेनाध्यवसायमयेन विमर्शेन । यदेव चान्तर्बुद्धिदर्पणेऽध्यवसायात्मकेन विमर्शेन निश्चीयते, तदेव वैखर्या वाचोच्यते बहिः । यदेव केनाप्युच्यते, तदेव परेण श्रूयमाणं सद् विमृश्यते तेन निर्विकल्पेन ज्ञानेन । यदेव चैवं श्रूयमाणं विमृश्यते श्रोत्रा तस्यैवार्थोऽवबुद्ध्यते तेन विमर्शात्मिकया विक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ल्पधिया। सर्वत्रात्र ज्ञानव्यापारप्रपञ्चे विमर्शात्मकं सूक्ष्मं स्थूलं वा शब्दनमेव जीवितम्। सैषा विमर्शात्मकतैव सर्वस्य ज्ञानप्रपञ्चस्य वाग्रूपता। तामेतामेवाधिकृत्योक्तं गुरुणा भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन दृश्यते॥
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥

इति (वा.प. १-१२३,-२४)

योऽसौ शब्दानुवेधः सर्वत्रावबोधेऽनुप्रविष्टः स चतुर्विधशब्दन व्यापारात्मकः। तत एव वाक् चतुः प्रकारा। तत्र प्राणीयेन प्रयत्नेन वागिन्द्रियेणोच्चार्यमाणा श्रोत्रेण च श्रूयमाणा या ध्वन्यात्मिका स्थूला शब्दना, असौ विशेषेण खरे, कठोरे, परस्परप्रतिघातकरे स्थूले शरीरे समुल्लसन्ती सती विखरे भवेति वैखरी वागित्युच्यते। यदुक्तम्—

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रमातॄणां प्राणवृत्तिनिबन्धना॥ इति।

कण्ठस्थानादुच्चार्यमाणा सतीयं कण्ठदेशगेत्युच्यते। अस्यां वाचि क्रियाकारकादिपदानां क्रमो लोकप्रथानुसारी क्वचिन्नियतः, क्वच्चि न सर्वथा नियतोऽपि। लौकिक वैदिकपरम्परागत सङ्केतसहायोऽत्र शब्दानुवेधोऽर्थावबोधे।

उच्चरितस्य वैखरीशब्दस्य श्रवणेन वा, मनः सङ्कल्पादिना वा यस्य कस्यापि प्रमातुर्बुद्धिभूमौ या या विचारात्मिका शब्दनाभिव्यक्ततामेति सा सा सूक्ष्मा वाङ् मध्यमेत्युच्यते। यतस्ततोऽपि सूक्ष्मतरा संविद्विमर्शमयी वाक् पश्यन्ती, ततः पश्यन्ती-वैखर्योर्मध्ये स्थितेयं मध्यमेत्युच्यते। नेयं वाग् वैखरीवद् ध्वनिमयी; अपि तु विचारात्मका सती बुद्धिमयी। किञ्च' स्थूलदेहमध्यगते पुर्यष्टकदेहे स्फुरन्ती सती मध्यमेयम्। तेन पदवाक्यादीनां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्तत्तदर्थविमिश्रं क्रमिकमवभासनं बुद्धिगतं तदनुसारि विमर्शनं मध्यमा वाक् । उक्तं च तथैवास्या लक्षणम्—

केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्रा॰॰वृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ।। इति ।

बुद्धिमयत्वेनैवास्या अभिव्यक्तेः स्थानं हृदयमित्युक्तम् । अस्यां वाचि बुद्धिभूमावपि क्रमेणैव क्रियाकारकादिपदानां बौद्धो विमर्शः । तत एव वैखरीवदियमपि क्रमरूपानुपातिनीति । अनयैव वाचा प्रमेयात्मकस्यार्थस्यावबोधो भवति सुस्फुटो जनानाम् । ततोऽस्या एव स्फोटोत्मकता लोक व्यवहारे । उभे अपि वैखरी-मध्यमे सङ्केत स्मरण साहाय्येनैवार्थावबोध साधनत्वमुपगच्छतः । भेदप्रधाना मायाभूमिरेवोभयोर्निजं क्षेत्रम् । सूक्ष्म तरायाः पश्यन्त्याः वाचः प्रसारः शुद्धविद्याया एव क्षेत्रे । नास्यां वाचि ध्वनिरूपस्य वा बुद्धिरूपस्य वा शब्द व्यवहारस्य कोऽप्यवकाशः । यत इयं केवलं संविद्विमर्शमयी । स्वप्रकाशः शुद्धश्च संविद्रूपः प्रमाता अनया वाचा स्वात्मानं शब्दार्थच्छायाखचितं, दर्पणमिव नगरप्रतिबिम्बयुतं, शुद्ध संवित्स्वरूपमेव, न पुनर्देहप्राणबुद्ध्यादि सम्भिन्नं विमृशति । अत एवास्याः मुख्यं क्षेत्रं शुद्ध विद्याभूमिरेव। शुद्ध विद्या हि सा भेदाभेदमयी स्थितिर्यस्यां संवित्स्वरूपेण चिदात्मना अहमितिसमुचितविमर्शेन शुद्धेन प्रमातृतत्त्वेन इदमितिसमुचितविमर्शस्य प्रमेयतत्त्वस्य विषये स्वाङ्गकल्पतयैव विमर्शनं क्रियते 'अहमिदम्' इति 'इदमहम्' इति वा । अस्यां भूमावहन्तेदन्तयोर्द्वयोः पदार्थयोर्विमर्शविषयत्वेन भेदः, उभयोश्च तयोः सामानाधिकरण्येन विमृश्यमानत्वेनाभेदोऽपि । तत एव भेदाभेदमयी भूमिरियम् । अस्यां भूमौ सर्वमपि सदाशिवादिक्षित्यन्तं तत्त्वजालं तदुद्भूतं च भुवनमण्डलं भावव्रातजातं चापि सर्वं सामान्याकारेणेदन्तामात्ररूपेण शुद्धे चिदात्मनि संवित् प्रकाशे तदङ्गभूततयैव प्रकाशमानं सत् तथैव विमर्शपदवीमधिरोहति । सैषा सदाशिवेश्वरोचिता मायोत्तीर्णा शुद्धविद्या नाम भूमिः । अक्रमविमर्शमयीयं स्थितिः ।नह्यत्र शब्दार्थयोर्वा अहमिदमोर्वावभासे कश्चनापि पौर्वापर्यात्मकः कालक्रमः । एतस्याः कालोत्तीर्णत्वात् । अमायीयत्वेन देशोत्तीर्णत्वादेतस्यां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नैव दैशिकोऽपि क्रमः। युगपदहमिदमित्युभयविमर्शपरिस्पन्दात्मिकेयम्। अत्र तावत् सामान्याकारप्रमेयांशरूषितस्य शुद्धसंविन्मयस्य भेदोत्तीर्णस्य प्रमातुरेव प्रकाशो, विमर्शश्च। ततो देशकालक्रमोत्तीर्णत्वादियं 'संहृतक्रमेति' लक्षिता सद्भिः। किञ्चः—यदेतस्याः स्वं संविद्विमर्शात्मकं स्वरूपं तस्यैव प्रकाशेन स्वयमेव प्रकाशमाना सतीयं निजशरीरकल्पं प्रमेयांशमपि तेनैव प्रकाशयति। न ह्यस्यामन्तः करणानां वा बहिष्करणानां वा कोऽप्युपयोगो, अवसरोऽपि वा तदुपयोगस्य। तेषां हि क्रमरूपता, अस्याश्चाक्रमता—युगपदेव सर्वात्मकता। अहमिदमंशयोरपि खल्वत्र युगपदेव प्रकाशविमर्शौ। यदेवात्राहमिति, तदेव चेदमित्यपि। तत एवोक्तमस्या लक्षणम्—

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥ इति।

ननु यदि शुद्धेयं चिदचिद्विमर्शमयी पश्यन्ती वाक्, तर्हीयमेवास्तु परा वाणी, किं तुरीयवाक्कल्पनायासेन। सत्यं, स्वरूपज्योतिष्ट्वेन शुद्धैषा, परं तथापि प्रमेयांशच्छायायाः स्वात्मन्यवभासनाद् भेदावभाससम्भिन्नापीयम्। ततः शुद्धा सत्यपि भेदांशच्छायामालिन्येन नेयं परा, अपि तु परापरैव। परस्याः सर्वथा भेदोत्तीर्णत्वात्। किञ्च—स्वात्मप्रकाशमध्ये प्रमेयांशस्य दर्शनं विमर्शनं च कुर्वतीयं पश्यन्तीत्येवोच्यते न परा। परा तु केवलं स्वात्मनैव प्रकाशते। तस्यां सर्वमहमित्यैव प्रकाशते विमृश्यते च। नासावन्यत् किमपि पश्यति। इयं पुनरिदमंशं पश्यति, ततः पश्यन्त्येव न परा। मितयोगिभिर्मणिपूरचक्रे धारणाभ्यासतोऽस्याः साक्षात्कारो लभ्यते, ततो नाभिसंस्थेति कैरप्युक्ता। एषा पश्यन्ती वाक् तुर्यदशोचिता भेदाभेदविमर्शात्मिका वाणी।

तुर्यातीते पुनः पदे, तुर्यपदस्यापि वोच्चतमे सोपाने, केवलं परिपूर्णस्य संविन्मात्रस्वरूपस्य परात् परतरस्यात्मनः एव प्रकाशः तस्यैव च विमर्शः। स च सर्वथाऽप्यनवच्छिन्नः, परिपूर्णः, शुद्धश्च "अहम्" इत्येव। स्वात्मनः पारमैश्वर्यात्मकस्य स्वभावस्याऽप्यत्र विमर्शो "अहम्" इत्येव। असौ पारमेश्वरः परिपूर्णः शुद्धश्च परो विमर्श एव परा वाक्। न तत्र स्वतो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिन्नस्य कस्यापि पदार्थस्य दर्शनम्। ततो नासौ पश्यन्ती, अपि तु परैव। परत्वं चामुष्या वाचः सर्वोत्तीर्णत्वं, परिपूर्णत्वं, पारमैश्वर्यं, सर्वस्योत्पत्ति लयस्थानत्वादिकं च। सर्वस्य लयोदयादौ संपद्यमानेऽपि न परावाग्रूपस्य परस्य तत्त्वस्य परिणामो विकारो वापि कश्चन; सृष्टिस्थितिलयादेर्दर्पण नगरन्यायेन प्रतिबिम्बकल्पतयैवाभासमानत्वात्। तथाविधाभासलीलास्वातन्त्र्यविमर्शात्मकत्वमेव हि परस्य तत्त्वस्य स्वभावभूतं परमेश्वरत्वं परावाग्रूपत्वं च। एवं स्वातन्त्र्यसिद्धान्तरूपं पारमैश्वर्यमभिप्रेत्य परतत्त्व विषये प्रोक्तमाचार्योत्पलदेवपादैरीश्वरप्रत्यभिज्ञायाम्—

चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः॥

(ई. ५.१-५-१३, १४)

एतस्याः परस्या वाचः क्षेत्रं शक्त्येकघना शिवभूमिः। मूलाधारचक्रे धृतधारणा मितयोगिनोऽस्याः साक्षात्कारं-लभन्ते, ततो मूलचक्रस्था इत्युक्ता कैरपि।

यदेव हि विश्वं परस्यां वाचि "अहम्" इत्येवमेव प्रकाशते विमृश्यते च सर्वथाऽभेदेन, तदेव पश्यन्त्यामाभासमानं सद् विमृश्यते भेदाभेदात्मकतया "अहमिदम्" इति वा "इदमहम्" इति वा। एतदुभयं भेदाभेदमयं सदाशिवेश्वरोचितं विमर्शनं स्वाङ्गविमर्शकल्पम्। उभयत्र विमर्शे शुद्धविद्यैव विजृम्भते। भेदैवप्राणा खलु याऽशुद्धा भूमिरसौ मायाक्षेत्रम्। तत्रैव मध्यमावैखर्योर्व्यवहारो न तदुपरि।

परा वाक् तिसृष्वप्यपरासु मूलाधारतयोतप्रोततया च व्यापिनी। तथैव पश्यन्ती द्वयोर्मध्यमा च वैखर्याम्। तेन पार्थिवाण्डवासिनो मर्त्याः अपि प्राणिनः पश्यन्त्याः परायाश्च व्यापाराननुतिष्ठन्ति, परं तांस्तथा नैव संविदन्ति। तेषां स्फुटं संवेदनं शाम्भवाद्युपायाभ्यासतोऽनायासमेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्भवति । तत्र हि पशुप्रमातॄणां सुषुम्नान्तःस्थं यत् प्राणशक्तेरान्तरतमं केन्द्रं तत्र संविन्मात्रस्वरूपस्यात्मनो यान्तश्चिदानन्द संरम्भमयी ज्ञानक्रिया-व्यापारोन्मुखतात्मिका स्वस्मिन्नेव स्वारसिका स्पन्दमानता, तस्या अभे-दात्मकोऽहमिति परमानन्दचमत्कारात्मको विमर्शो हि परावाग्रूपः । ततस्तस्य विमर्शस्य बहिर्मुखतामापन्नेव या ज्ञानक्रियोन्मुखीभूता स्वाभाविकी प्रवृत्तिमयीच्छा, यस्यां चैषणीयं सामान्याकारेणैवोन्मीलितं सत् प्रकाशते, तस्या भेदाभेददृष्ट्या विमर्शः पशुप्रमातृषु पश्यन्ती वाक् । क्षणिकमेतस्याः संवेदनं तु लोकव्यवहारेऽपि हर्षशोकक्रोधभयाश्चर्यादिभावानामत्युद्रेकस्य क्षणेषु, धावनादित्वरितक्रमात्मिकानां क्रियाणां वा क्षणेषु, काव्यनाट्यादि-रसचर्वणाक्षणेषु वा, एवम्प्रायेषु वान्येष्ववसरेषु सम्भवत्येव । परं तस्य संवेदनस्य सम्यग् हृदयङ्गमीभावो न सम्पद्यते । क्षणानां तेषामतिसूक्ष्म-त्वादचिरद्युतिवत् क्षणदृष्टनष्टत्वाच्च पश्यन्त्यास्तस्य प्रकाशस्य । अतो नासौ पश्यन्ती प्रकाशसंस्कारो दृढतामायाति । तस्य दृढतास्थिरतादि सम्पादका ह्युपायाः शाम्भवशाक्ताद्याः ये तन्त्रालोकादौ प्रतिपादिताः । रहस्योपायपरा उत्कृष्टाः साधका मकारसेवनाभ्यासेनात्मानन्दचमत्कारप-रिस्पन्दिनीं पश्यन्तीं सम्यक् समुत्थाप्य स्थिरतया च तस्यामवधानं सन्निवेश्य तदुपायत एव स्वात्मसाक्षात्कारभाजो भवन्त्यचिरादनायासमेव; परामपि च वाचं साक्षात्कुर्वन्ति ।

परापश्यन्त्योः स्वरूपस्य रहस्यानीमानि सोमानन्दनाथस्य शिव-दृष्टावुत्पलदेवाचार्यस्येश्वरप्रत्यभिज्ञायामभिनवगुप्तवर्याणां च तन्त्रालोकादौ सूक्ष्मतरविचारपूर्वकं प्रतिपादितानि विस्तरतः । तानि शास्त्राण्यधीत्यैव भर्तृहरे-रिदं वाग्दर्शनं हृदयसन्तोषप्रदं भवति । पूर्णस्तु सन्तोषः शाम्भवाद्यु-पायपरिशीलनत एव भवतीत्यलमतिविस्तरेण ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं सत्यं किं वाऽनृतम्

—हिमांशु चक्रवर्ती

सत्यमाहात्म्यम्

सत्यं वक्तव्यमिति सर्वेषां शास्त्राणां समुद्घोषः। सत्यस्य खल्वेतावदेव माहात्म्यं यदेकं सत्यमश्वमेधसहस्राादपि समादृतम्। सर्ववेदाध्ययनं सर्वतीर्थस्नानमपि सत्येन तुल्यं स्यान्न वेति संशयो विद्यते। सत्यसमो धर्मो नास्ति, सत्यादुत्कृष्टमपि न किञ्चिदस्तीत्यादिकं सत्यप्रशंसनं महाभारते भूयोभूयो विद्यते। उद्ध्रियते च ततः—

अश्वमेधसहस्रं च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम्।
सत्यं च वचनं राजन् समं वा स्यान्न वा समम्॥

(महा. १।७४।१०३-४)[1]

---

१. महाभारतेऽन्यत्रापि—

तुलामारोपितो धर्मः सत्यञ्चैवेति नः श्रुतम्।
समकक्षां तुलयतो यतः सत्यं ततोऽधिकम्॥

(१२।१९९।६९)

अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयात्॥

(१३।२२।१४)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगदर्शनसम्मतं सत्यम्

अष्टाङ्गयोगस्य प्रथममङ्गं तावद् यम इति। यमश्च पञ्चविधः— अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः ।[1] तत्र द्वितीयस्य यमभेदस्य सत्यस्य स्वरूपमुक्तं व्यासभाष्ये 'सत्यं यथार्थे वाङ्मनसे' इत्यनेन ।[2] वाचो मनसश्चार्थानुसारित्वे सत्यं भवति। एवञ्च त्रितयस्य समानत्वमपेक्षितम्। यथा विषयस्तथा ज्ञानं तथैव च भाषणं चेत्तदा सत्यं पदं लभते। यदीन्द्रियाद्यपाटवादिवशाज् ज्ञानं विषयव्यभिचारि स्यात्तदा न सत्यं सम्भवेत्, यदि ज्ञानं यथा भवति तदतिरिच्यान्यथा भाषणं कुर्यात्तदानीमपि न सत्यं रक्षितं भवेत्।

वञ्चिता वाक्

भवतु, वाचो मनसश्च केवलमर्थानुसारित्वे यदि सत्यं स्यात्तदा 'अश्वत्थामा हतः' इति युधिष्ठिरवचनमपि सत्यं स्यात्, परन्तु तत्र युधिष्ठिरेणानृतमेव भाषितमिति भारतग्रन्थाशयः सर्वेषां विदित एव। तस्माद् भाष्यकारेण व्यासेन पुनरुक्तम्—"परत्र स्वबोधसंक्रान्तये वागुक्ता, सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेदिति।" (२।३०)। युधिष्ठिरवचने यद्यप्यर्थानुसारित्वमासीद् अश्वत्थाम्नो निहतत्वात् तथापि निहतोऽयमश्वत्थामा कश्चन गज एव, न तु द्रोणपुत्रः। युधिष्ठिरः खलु हस्तिनिधनविषयकं स्वबोधं न संक्रामितवान् किन्तु वञ्चनया द्रोणपुत्रनिधनविषयकं ज्ञानं समजनयदिति मिथ्यैव भाषितं तेन। नेदं संक्रामितं ज्ञानं तथ्यं किन्तु मिथ्यैवेति जानन्नपि जयैषी युधिष्ठिरोऽव्यक्तरूपेण 'कुञ्जर इति' इत्यंशं भीतभीतः प्रोवाच।[3] स्वपुत्रो निहत इति मत्वा योद्धुं

---

१. पातञ्जलसूत्रम् २।३०

२. व्यासभाष्यम्, तत्रैव

३. तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः।
अव्यक्तमब्रवीद्राजन् हतः कुञ्जर इत्युत ॥
(महा. ७।१६४।१०६) (भाण्डा.संस्क.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न समर्थो महावीरो द्रोणाचार्यः। एतादृशमिथ्याभाषणवशाद् युधिष्ठिरस्य हानिरपि तत्क्षणादेव सञ्जाता। इतः पूर्वं युधिष्ठिरस्य रथश्चतुरङ्गुलोच्छ्रितोऽपि ततः प्रभृति मिथ्याभाषणजनितपापवशादितरजनरथवद् भूमौ चलन्नासीत्।[1]

भ्रान्ता वाक्

भ्रान्तापि वाग् मिथ्यैव भवति। भ्रान्तिश्चार्थावधारणकाले स्यादथवाऽर्थानुसारिज्ञानप्रकाशे समुत्पद्यते। यदि स भ्रमो ज्ञानकाल एव स्यात्तदा सत्यं खलु मूलत एवोच्छिन्नम्; यदि तु मनसो वागिन्द्रियस्य चोभयोरन्यतरयोर्वा दोषाद् विवक्षासमये ज्ञानसंक्रमणकाले वा भ्रमो लब्धप्रसरः स्यात्तदापि जायते खल्वसत्यमिति तदपि न श्रेयसे।

प्रतिपत्तिबन्ध्या वाक्

प्रतिपत्तिबन्ध्या नाम तादृशी वाग् यतो न प्रतिपत्तिरेव भवति श्रोतुः। श्रोतृबोधार्थमेव वाक्यमुदीर्यते किन्तु यदि श्रोतृबोधाविषयेण भाषाविशेषेण वाक्यं प्रयुज्येत तदा बहुगुणान्वितमपि तद्वचनं व्यर्थं निष्फलं भवेत्। तादृशी निष्प्रयोजना वन्ध्या वाग् मिथ्यैव। महाभारते जतुगृहदाहात् पूर्वं विदुरेण प्रोक्तं म्लेच्छभाषावचनं मिथ्या न जातं यतः कुन्तीसहितभीमादिष्वनगच्छत्स्वपि युधिष्ठिरो बुबुधे।[2]

---

१. तस्य पूर्वं रथः पृथ्व्याश्चतुरलमुङ्गुच्छ्रितः।
बभूवैवञ्च तेनोक्ते तस्य वाहोऽस्पृशन् महीम्॥
(महा. ७।१६४।१०७ (भा० सं०)

२. अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत्।
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव।
त्वया च स तथेत्युक्तो जानीमो न च तद्वयम्॥
(महा. १।१४५।२६।२६)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतोपकारार्था वाक्

पातञ्जलभाष्यकृता व्यासाचार्येण वाचोऽन्यदपि सार्थकयं समुट्टङ्कितम्। न खलु केवलमभिप्रायसंक्रमण एव वाचस्तात्पर्यं परन्तु भूतोपकारोऽपि तस्या एकः सुमहानुपयोगः। यदि तथ्यमनुसृत्य वाक् प्रयुज्येत, तथा च तया वाचा भूतानां हानिः स्यात्तर्हि तथ्यानुसारित्वेऽपि तादृश्या वाचः सत्यत्वं न सञ्जायते किन्तु सा मिथ्यैवेति मन्तव्यम्।[1] महाभारते कर्णपर्वणि किञ्चिदाख्यानं लभ्यते। कौशिको नाम कश्चित्तपस्वी सत्यवादी नदीसङ्गमे ग्रामाद् दूरादेव न्यवसत्। दस्युभयात् पलायिताः केचन पुरुषाः कौशिकस्य पुरतो धावन्तो बहुवृक्षलतागुल्मसमन्विते वने सभयमाश्रयं लब्धवन्तः। सत्यव्रतोऽयं कौशिकः पृष्टः सन् दस्युभ्यो गुप्तं तदाश्रयस्थानं निर्दिदेश। दस्युभिस्ते पुरुषा निहता इति कौशिकवचनमेव मृत्युकारणं जातमिति कौशिको भूतापकारहेतोः कष्टं नरकं प्राप।[2] अत्र महाभारतस्येयं शिक्षा यदेतादृशे स्थले न किञ्चिदपि वक्तव्यम्, किन्तु यदि वक्तव्यमेव तदा मिथ्यैव वक्तव्यम्, तदेव मिथ्या तत्र सत्यं भवति।[3] भूतोपकारं

१. "एषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय। यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत्, पापमेव भवेत्। तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टतमंप्राप्नुयात्। तस्मात् परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्।" (व्यासभाष्यम्, २।३० सू.)

२. स पृष्ठः कौशिकः सत्यं वचनं तानुवाच ह।
बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः॥
इति तान् ख्यापयामास तेभ्यः पार्थ स कौशिकः।
ततस्ते तान् समासाद्य क्रूरा जघ्नुरिति श्रुतिः।
तेनाधर्मेण महता वाग्दुरुक्तेन कौशिकः।
गतः स कष्टं नरकं सूक्ष्मधर्मेष्वकोविदः॥
(महा. ८।६९।५१-५३)

३. अवश्यं कूजितव्ये वा शङ्केरन्नप्यकूजतः।
श्रेयस्तत्रानृतं वक्तुं तत् सत्यमविचारितम्॥
(महा. ८।६९।६१)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धर्ममुद्दिश्य यद्यनृतमप्युक्तं स्यात्तदानृतवचनजनितं पापं न स्यात् ।[1]

मिथ्यापि न दोषाय—पञ्च स्थलानि

प्रसङ्गतो महाभारते प्रोक्तस्य मिथ्यापञ्चकस्यापि सत्यत्वं यथा स्यात्तदुच्यते—

विवाहकाले रतिसम्प्रयोगे प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत पञ्चानृतान्याहुरपातकानि ।।

तत्रानृतं भवेत् सत्यं सत्यञ्चाप्यनृतं भवेत् ।
(८।६९।३४-३५)

विवाहकाले वरवध्वोर्वयो गोपितमेव भवतीति सर्वजनीनोऽनुभवः । वरस्य कन्याया वा रोगादिकमपि न समुल्लिख्यते । 'ममेयं कन्या सर्वकर्मनिपुणा स्वास्थ्यवती'त्यादिकमुच्यत एव । रतिप्रयोगे 'त्वमेव मे जीवितं, त्वमेव प्रियतमः प्रियतमा वा' इत्यादि मिथ्याभूतमपि वक्तव्यं भवति । प्राणरक्षार्थं मिथ्या वक्तव्यमेव । सर्वस्वनाशापत्तौ तद्रक्षणार्थं यदि मिथ्याभाषणमावश्यकं स्यात्तर्हि तत् सत्यमेव । त्यागतपस्याविद्यादिबहुगुणाकरो विप्रो रक्ष्येत यदि मिथ्या प्रोच्येतेति समवस्थायां मिथ्याभाषणमेव विधीयते, तदेव सत्यं स्यात् ।

बालशिक्षार्थं मिथ्यावचनम्

बालशिक्षायामपि सत्यस्य त्यागो भवति बहुशः । लिपिर्न वर्ण इति सर्वैर्ज्ञायत एव किन्तु बालशिक्षायां लिपिमेव वर्णत्वेनोपदिशन्ति पण्डितास्तथा च ते न मिथ्यावादिन इति सर्वेषामैकमत्यम् । तत्रासत्यस्य परिग्रहे सति पश्चात्तद् द्वारा सत्यस्य तत्त्वस्यावगमो भवेदित्याशयेन पण्डिता अनृतमपि वदेयुः । तथा चोक्तं भर्तृहरिपादैः—

---

१. तस्माद्धर्मार्थमनृतमुक्त्वा नानृतवाग् भवेत् ।। (महा.८।६९।६६)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥[1]

अगतिकतया मिथ्याभाषणम्

कुतूहलिनः शिशवो नानाविधान् प्रश्नान् पृच्छन्ति, तेषां प्रश्नानामुत्तरमपि यथासाध्यं पित्रादिभिर्दीयत एव । किन्तु प्रश्नादनन्तरमन्यः प्रश्नः 'कथं तत्', पुनस्तस्योत्तरे 'कथं तत्' इति प्रश्नधारायां विश्रान्तिर्यदा न स्यात्तदानीं मिथ्यैव प्रोच्यते, अगतिकत्वात् ।

करुणया मिथ्यावादः

भिषग्वरो रोगिणं पर्यवेक्षते, दुरूहोऽयं व्याधिरिति सम्यग् जानन्नपि स वैद्यः कथं प्रभाषेत—'दुश्चिकित्सोऽयं व्याधिः' इति । ब्रवीत्येव—'मन्ये स्वस्थो भविष्यसि' । अत्राप्यनृतं समाश्रितं करुणया ।

कुत्रचिदनृतमपि हितकरम्

नीतिवचने बहुमानभाषणे भावनायामाहार्यज्ञाने च मिथ्यैव सोपानभूतम् । रामायणे वनगमनकाले लक्ष्मणं प्रति सुमित्रावचनं तत्त्वदृष्ट्याऽनृतमेव, तथापि ज्येष्ठभ्रातरि पितृरूपकल्पने, तद्भार्यायां मातृरूपसमारोपे, अयोध्यायामटवीरूपचिन्तने, रामसहितारण्ये चायोध्यारूपभावनायां या नीतिर्विद्यते तथा व्यावहारिकजगति शान्तिः शृङ्खला सन्तोषश्च समायाति तथा च रामायणे—

---

१. वाक्यपदीयम् २।२३८ । अत 'उपलालनाः' इति शास्त्रेषु वहुलप्रचलितः पाठः । 'अपलालनाः' इत्यपि पाठो दृश्यते । तात्पर्ये तु भेदो नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ।।

(२।४०।६)

समादरणीयपुरुषे गृहागते सति तद्बहुमानार्थं सांसारिकैः सविनयमुच्यते—'मादृशस्य दरिद्रस्य कुटीरे भवादृशस्य महाजनस्य शुभागमनेन नितरां प्रीतोऽस्मि' इति। वक्तुर्महाधनत्वेऽपि श्रोतुश्च सामान्यजनत्वेऽपि सदाचारमूलकमेतादृशं वचनमनृतमपि प्रशंसितमेव। प्रतिमादिषु विष्णु-शिवादिभावनापि 'अतस्मिंस्तद्बुद्धिः' इत्यनृतमेव। पूजाद्यनुष्ठाने सरसोऽपि जले गङ्गातोयभावनापि न सत्यानुसरणं परन्तु मानसपावित्र्यमूलकं पार्थिवपावित्र्यं तत एव समागच्छति। एवमनृतस्यापि हितजनकत्वं न विस्मर्तव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदार्थनिर्णयः

—डा० यज्ञवीरः

O वेदार्थनिर्णयः कथं स्यादिति प्रश्नावतारे विप्रतिपद्यन्ते बहवो विद्वांसः । केचित्तु सायणो-उव्वट-महीधर-वेंकटमाधव-स्कन्दस्वाम्युद्गीथ मुद्गल-भट्टभास्कर-वेलकरप्रभृतीनां प्राचीनविदुषां वेदभाष्यपद्धतिरेव साधुरिति मन्यन्ते । एवमेवापरेषां मतं वोल्डनबर्ग-गैल्डनर-ग्रासमैन-ग्रिफिथ-पीटर्सन-बर्गेन-मैक्डानल-मोनियरविलियम्स-पिशेल-विलसनादीनां पाश्चात्यविदुषां वेदव्याख्यानं गाम्भीर्यादिनिखिलातिशायिगरिष्ठगुणगरिम्णा वैज्ञानिकीं पद्धतिमाद्रियमाणं मध्यमणिरिव राराज्यते । प्राचीनार्वाचीनयोः कतरद् व्याख्यानं साध्विति विषयमवलम्ब्य ममैको लेखः **'प्राचीनार्वाचीन-वेदभाष्यकाराणां तुलनात्मकमध्ययनम्'** विश्वसंस्कृतं नाम्नि, (विश्वेश्वरानन्दवैदिकशोधसंस्थानं, साधुआश्रमः') होश्यारपुरतः, जूनमासे एकाशित्युत्तरैकोनविंशतितमे क्रैस्ते प्रकाशितायां पत्रिकायां कानिचित् पृष्ठानि लेभे । तत्र तु एष निर्णयः, प्रायेण पाश्चात्यविद्वांसः वेदवर्णनशैलीमनुगच्छन्त एव वैदिकसाहित्यशब्दानां व्याख्यानं लौकिकसंस्कृतदिशैव कुर्वन्तीति निश्चप्रचम् । तच्चलौकिकगन्धीति कृत्वा वैदिकसाहित्यतत्त्वकोविदैर्नाद्रियते यथार्हम् । यथा हि सायणादयः भारतीयभाष्यकारा वैदिकशब्दानां काठिन्यपारमधिजिगांसवः **'व्यत्ययो बहुलम्'** अवलम्बन्ते तथैव ग्रासमैन-ओल्डनबर्ग-लुड्विगादयः पाश्चात्यविद्वांसः **पाठसंशोधनं** स्यादित्येव आशेरते । परमत्रास्ति विचिकित्सा, यद् व्यत्ययो बहुलं-पाठसंशोधनमित्यादीनामवलम्बनं वैदिकशब्दान् यथार्थस्वरूपतः अपाकरोति । एतादृशेऽव-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुञ्चनीये राद्धान्ते उपजीव्ये सति यथेच्छं स्वार्थसाधकञ्च वेदव्याख्यानं सर्वदैवातिगभीरान् पूर्वाग्रहान् पक्षपातादीन् अनुसरति, तथा च तद् भाष्य-पदाच्च्यवत इति निर्विशङ्कम् ।

I. O कः खलु वेदप्रतिपाद्यो विषय इति प्रश्नस्त्वतीव जटिलः । कः खलु वेदानामविषयः ? इति प्रश्नोऽपि समकालावच्छेदेनैव समुज्जृम्भते । को हि नाम स विषयो यो वेदेषु न चर्चितः । वेदो हि नाम अशेषविश्व—विज्ञानविशेषपरिज्ञानप्रदं शाश्वतिकमपौरुषेयं शास्त्रम् । "विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः," इति बह्वृक्प्रातिशाख्यवृत्त्युपक्रमे । "अपौरुषेयं वाक्यं वेदः," इति सायणीय ऋग्भाष्ये । "इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकमुपायं यो वेदयते स वेदः," इति सायणः । "विदन्ति, जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति, विन्दते लभन्ते सर्वाः सत्यविद्या यै र्येषु वा," इति दयानन्दः । तदेषां सर्वेषां व्युत्पादनानां तात्पर्यार्थस्तु समान एव । स च वेदानामखिलविद्यानिधानत्वेऽपौरूषेयत्वे च पर्यवसित इति नास्ति सन्देहलेशोऽपि । अस्मिन्निबन्धे मयास्ति प्रतिपादनीयं यद्वेदार्थनिर्णये कतमां पद्धतिं, कं राद्धान्तम्, उपजीव्य अशेषविशेषज्ञानविज्ञानप्रतिपादकः शाश्वतिकः व्युत्पत्तिलभ्यः तात्पर्यविषयीभूतोऽर्थ उपगम्येत !

II. O वेदार्थनिर्णयार्थं बहवो विधयः समाश्रियन्ते । तेषु प्रथमः पदपाठः येन संहितानि पदानि छित्त्वा संहितापाठस्य मौलिकं रूपं प्रदर्शितं भवति । मन्त्राणां मूलार्थविवेचने, स एष पदपाठप्रपञ्च एव निकषायते । ततः संहितापाठं प्रक्षेपच्युत्यवसादादिविकारेभ्यः परित्रातुं पद-क्रम-धन-जटादि पाठा आविष्कृताः । यथा न तत्राणुमात्रमपि दोषलेशः संश्लिष्येत् । न च मात्रयाऽपि कश्चिदाविलीकुर्यात् संहितापाठस्य तन्मौलिकमौज्ज्वल्यम् । व्याडिमुनिकृतायां विकृतिवल्ल्यां निगदितम् —

जटा माला शिला लेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ।।

तदेवंविधा अष्टविकृतयो भवन्ति ये वेदार्थनिर्णये महतीं सहायतां कुर्वन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

III. ० वेदार्थनिर्णये व्याकरणशास्त्रस्यापि महतीभूमिका वर्तते। अनेन हि किल मन्त्रपदपाठे विश्लेषितानां पदानां पुनः संश्लेषे समुत्पद्यमाना वर्णविकारविशेषा व्याक्रियन्ते । इदं हि खलु वैदिकव्याकरणम् उत वा प्रातिशाख्यमुच्यते। वैदिकशब्दानां व्युत्पत्तिव्याकृतिनिर्वचनस्वरोच्चारणादीनां विवेचनेन वेदार्थनिर्णयोऽतीव सुकरः। वेदानां व्याख्यानार्थमेव प्रातिशाख्यानां प्रवृत्तिः । वेदार्थनिर्णयोऽतीव साधुरीत्या स्यादिति हेतोरेव वेदानां प्रत्येकशाखामधिकृत्य प्रवृत्तत्वाद्धि शास्त्रमिदं प्रातिशाख्यपदेनाभिलप्यते। शाखां शाखां प्रति प्रतिशाखं, प्रतिशाखमधिकृत्य प्रवृत्तम्प्रातिशाख्यमिति तद्व्युत्पत्तेः । परमेतद् व्युत्पत्तिबलादनुमीयते। यावत्यः शाखास्तावन्ति प्रातिशाख्यान्यपेक्ष्यन्ते । पतञ्जलिप्रणीते महाभाष्ये "एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधाबाह्वृच्यं नवधाथर्वणो वेदः"। एवं त्रिंशदुत्तरैकादशशतसंख्यामितानां शाखानां वर्णनं समुपलभ्यते। परन्त्वेतावन्ति प्रातिशाख्यानि नोपलभ्यन्ते । सम्प्रति तेषु षट्संख्यकान्येव प्राप्यन्ते। अन्यानि लुप्तानि किलेत्यनुमीयते। प्रातिशाख्यानां पर्यालोचनेन ज्ञायते यद्वैदिकशब्दानां व्याकरणप्रक्रियाप्रदर्शनं हि तेषां मुख्यं प्रयोजनम् । येन वेदार्थनिर्णये पर्याप्तं साहाय्यं लभ्यते। प्रातिशाख्यानां प्रतिपाद्यविषया वेदार्थनिर्णये सहायका भवन्ति तद्यथा—वर्णसमाम्नायः, स्वरव्यञ्जनानां गणना, तदुच्चारणविधयश्च, अज्झलविसर्गादिसन्धिप्रवृत्तयः, प्रगृह्यादिसंज्ञाः, पदविभागनियमास्तदपवादनियमाश्च, उदात्तानुदात्तस्वरितभेदा आख्यातस्वराः, पदपाठवर्णोच्चारणनियमाः सर्व एव वेदार्थः प्रत्याख्याने सहायकाः भवन्तीति को नाम संशयीत।

IV. ० वेदशब्दार्थाववोधने स्वराणां प्रवृत्तिर्भवति। तत्तच्छब्दगतोऽर्थोऽतिस्वरैर्निर्धार्यते। वेदार्थविशेषावगतिहेतवो हि स्वरा भवन्ति। यथा चाह तत्र भगवान् पतञ्जलिर्व्याकरणमहाभाष्ये—"याज्ञिकाः पठन्ति। स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत," इति। तस्यां सन्देहः स्थूला

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चासौ पृषती च स्थूलपृषती स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यतीति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासोदात्तत्वं ततस्तत्पुरुष इति। इत्थं वेदार्थनिर्णयोऽपि स्वरायत्त एव। अपि च—

IV. 1 "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति। यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति। अत्र इन्द्रः शत्रुर्यस्य, इन्द्र एव वा शत्रुरिति वेदार्थनिर्णये सन्देहः स्वरेणैव निर्धार्यते।

IV 2. एवमेव वेदवाक्यनिर्णयोऽपि स्वरैरेव विधीयते। यत्र क्वचिन्मन्त्रेषु मुद्रणादिदोषविशेषवशंवदतया, विरामादिचिह्नाऽनङ्कितेषु कुतो वाक्यमारभ्यते कुत्र वावसीयत इति परिज्ञातुं न पार्यते तत्र स्वरलिङ्गैरेव निर्णेतुं शक्यते किल इदन्तयेति। तद्यथा—'पत्नीवन्तं ग्रहं गृह्णान्यग्न' इत्यत्र पत्नीव' इह अन्तिमं पदद्वयं किं पूर्ववाक्यसम्बन्धि? उत वा उत्तर-वाक्यसम्बन्धीति सन्देहे प्राप्ते स्वरेणावधार्यते यदि आमन्त्रितत्वादनुदात्तत्वं ततः पूर्वान्वयि, आद्युदात्तत्वे तु खलूत्तरान्वयि, इति। इत्थमेव "अदर्श्म ज्योतिरविदाम देवान्" इत्यत्र देवान् अदर्श्म, ज्योतिरविदाम इति नान्वयः स्वरविरोधात् इति स्वरावष्टम्भेनैवावगम्यते। एतस्मात् सम्यग्वेदवाक्यभेदज्ञानमपि स्वरैरेव निर्धार्यत इति निर्विशङ्कम्।

V. O. वेदार्थनिर्णये वेदेषु बहुत्रोपनतः पाठभेदो बहुधा काठिन्यमुपजनयति। तत्रोच्यते, सत्यं, तादृशा अवभासमाना भेदा बहुशः परश्शतसंख्यकाश्च नयनगोचरीभवन्ति। परन्तु नैते भेदाः शब्दान्यत्वकृता अपितु संहितावशात् किञ्चित्स्वरूपभेदं प्रापिता बहुधा अवगम्यन्ते। प्राधान्येन लौकिकसंस्कृतोपनतसन्धिनियमवशादुपपद्यन्ते। तत्त्वतो विमृश्यमाने विज्ञातं भवति यदीदृशा विकारः प्रायशः सन्धिनिमित्तका एव। तेऽपि क्वाचित्का न सार्वत्रिकाः। ये तु खलवन्ये विकारा शब्दान्तरत्वेनोपलभ्यमाना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दृश्यन्ते ते तु दवीयसः कालादागताः तत्तच्छाखाविशेषोपनता वर्णोच्चारणभेदपारवश्याद्वा क्रमिकधारावाहिकतया तथा पाठभेदत्वेन परिणताः। अल्पीयांस इमे पाठभेदा न भूयांस इति। कारणान्तरं तु मृग्यमाणमपि बुद्धिसरणिं नावतरति। वस्तुतः किन्निमित्तका इमे पाठभेदा इत्येवंविधा जिज्ञासा तु नूनं भूयस्तरमनुसन्धानमपेक्षते। वेदार्थनिर्णये महतावधानेन एतदनुसन्धेयं यन्मन्त्रोऽयं वैदिकवाङ्मयस्य कस्यां शाखायां कस्मिन्प्रसङ्गे वा समायातः। यतो हि अनया विधया विश्लेष्यमाणे सति वेदार्थे निर्णयं कर्त्तुं पारयामः।

VI. O. वेदार्थनिर्णये हि दैवतपरिज्ञानमावश्यकम्। अविदित्वा तु दैवतं न यथार्थार्थसंविधानाय कश्चित् कल्पते। तथा कुर्वाणश्च अविदितदैवतविज्ञानो व्याकुलीकरोति मन्त्रप्रतिपाद्यमाशयमिति वेदविदां प्रवादः। विज्ञातदैवतेनापि विनियोगवशात् कृतोऽर्थो न मनाक् स्वारस्यमश्नुते। विनियोगो हि नाम मन्त्राणां इदंकर्त्तव्यतया कर्मभिर्विशेषः सम्बन्धः। कर्मभिः सम्बन्धोविनियोग इत्युक्तम्। तत्र कस्य केन कर्मणा विनियोगः कुतश्चेत्येतद्विषये मीमांसकैः श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या-लक्षणाणि षट् प्रमाणानि सूत्रितानि, तेषां पूर्वापेक्षया परवर्त्तिनां दौर्बल्यम्। तत्र साक्षात्सम्बन्धबोधकः शब्दः श्रुतिः। श्रुतिमपेक्ष्य विनियोगः श्रौतविनियोगः। लिङ्गं नाम शब्दनिष्ठम् अर्थनिष्ठं वा सामर्थ्यम्। तदपेक्ष्य कृतो विनियोगो लैङ्गिकविनियोगः। उक्तञ्च—"अनेनेदं तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः" इति। स च विनियोगो द्विविधः सामान्यो विशेषश्च। कृत्स्नायाः संहिताया आम्नातक्रमेण यस्मिन् कस्मिन् वापि कर्मणि कृतो विनियोगः सामान्यः। विशेषस्तु तत्तत्क्रतौ सूत्रकारैराश्वलायनादिभिः स विशेषं निर्दिष्टः। स च पुनस्त्रिविधः, सूक्तविनियोगः, त्र्यर्चादिविनियोगः एकर्चादिविनियोगश्च। तद् विनियोगानुरोधेन, तत्तत्क्रत्वर्थमपेक्ष्य कृतस्यार्थस्य, मन्त्रार्थस्वारस्यविरहान्न तथा प्रामाण्यं यथा दैवतमपेक्ष्य प्रकरणानु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारेण मन्त्रगतपदार्थस्योहापोहव्यूहसमर्थितस्यार्थस्य । अतः विनियोगमनुसन्धाय कृतोऽर्थो न कर्हिचित् संहितायामाम्नातमन्त्रक्रमस्वारस्यमधिष्ठाय कृतस्य वेदार्थस्य तुलामधिरोहति । तस्मान्मन्त्रस्वारस्यसमर्पितोऽर्थ एव मुख्यः । विनियोगजोऽर्थश्च गौण इत्यवधेयम् ।

VII. O वेदार्थनिर्णये छन्दोऽप्यतीव गौरवशालिनदं धत्ते । इदं हि किल छन्दःशास्त्रं नाम यदखिलकाव्यप्रपञ्चस्य प्रसवभूभिः । वेदस्याऽपि अमरकाव्यत्वं समाम्नातम्—'पश्य देवस्य काव्यं न ममार न जीर्यति' इति । तावता श्रुतिरपि छन्दोनिबद्धा काव्यमयी वागित्यभिहितं भवति । काव्यन्तु गद्य-पद्य-तदुभयभेदात् त्रिविधम् । वेदाभिधं काव्यमपि गद्य-पद्य-तदुभयभेदात् त्रिविधमेव । तत्पद्यशालिनी ऋग्लक्षणा श्रुतिततिः छन्दोज्ञानमन्तरा सम्यक् परिशीलयितुं न शक्या । अतश्छन्दोज्ञानस्यावश्यकत्वम् । प्रतिपादितञ्च शिक्षायाम्—'छन्दः पादौ तु वेदस्येति' । इति हेतोरेव छन्दःशास्त्रं वेदार्थनिर्णये प्राधान्येन समाद्रियमाणं सञ्चाकशीति ।

VIII. O. वेदार्थनिर्णये निर्वचनपद्धतेरपि भूयो योगदानं विद्यते । यास्कीयनिरुक्ते प्रायेण मन्त्रपदान्येव उदाहरणत्वेनोपात्तानि । मन्त्रगतानामेव पदानां निर्वचनानि व्याख्यानानि च समुपलभ्यन्ते निरुक्ते । यास्कस्य निर्वचनशैल्यपि विलक्षणा हृदयङ्गमा च । यथा—"नरकम्-न्यरकं-नीचैर्गमनम्-नास्मिन् रमणं स्थानमल्पमस्तीति वा ।" तथा च निरुक्तस्य वेदमन्त्रार्थप्रकारो निभालनीयः ।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।

(ऋग्वेद x. १२१.१)

हिरण्यगर्भः हिरण्मयो गर्भोऽस्येति । हिरण्यं कस्मात् ह्रियते आयम्यमानं वा, ह्रियते जनाज्जनमिति वा, हितरमणं भवतीति वा, हर्यतेर्वा स्यात् प्रेप्साकर्मणः । अग्रे समभवत् भूतस्य जात एक एव पतिः । स दाधार

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृथिवीं दिवञ्च। सूर्य एव आकर्षणद्वारा पृथिवीं धारयति दिवञ्चेति भावः।

VIII. 1. इत्थं वेदार्थनिर्णये निरुक्तस्य निर्वचनपद्धतिः सर्वैर्वेदविद्भिराद्रियमाणा सरण्यन्तरेषु शिखरायते। यद्यपि पुरातनेषु वेदव्याख्याकारेषु भूयांसो मतभेदा अभूवन् इति यास्काचार्यवचनादेव विज्ञायते, परन्तु कतमो वा मार्ग आश्रणीयः कतमो वा निराकरणीय इति महती विप्रतिपत्तिरासीद् वेदार्थबुभुत्सूनां पुरस्तात्। तदेतस्मिन् विविधार्थे व्यामूढाः केचन तु इयद्यावदपि प्रधावन्तो निर्व्याजञ्च समुदघोषयन् यद् अविस्पष्टार्थत्वात्, अनर्थकत्वात्, विप्रतिषिद्धत्वाच्च वेदार्थप्रयास एव खल्वपार्थः नतरां करणीय इति। परन्तु यास्कोऽत्र प्रत्यवतिष्ठते 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति। पुरुषापराधः स भवति' इति। पुरुषस्यैव स बुद्धिवैकल्यकृतोदोषो यत्तेनार्थो न बुध्यते, न कर्हिचित् श्रुतेरिति तदेवं जातीयकान् अश्रद्धधानान् वेदार्थं प्रति विप्रतिपद्यमानान् जनान् वेदार्थान् याथातथ्येन प्रत्याययितुं कामपि सत्सरणिमाविश्चिकीर्षुः परमकारुणिक आचार्य इमां स्वोपज्ञां सरणिं निर्वचननिवन्धनामाविर्भावयामास। तत्र च सर्व एव वेदाभिरूपशिरोमणयः सुतरां श्रद्धधतेतराम्। सेयं निर्वचनात्मिका सरणिः सर्वैः शरणीकरणीयेति।

VIII. 2. वेदार्थनिर्णयमधिकृत्य एका व्यवस्था विहिता यास्केन सा तु निरतिशयमहत्त्वपूर्णा—"श्रुतितोऽपि तर्कतोऽपि न तु पृथक्तया मन्त्रा निर्वक्तव्याः, प्रकरणत एव वक्तव्या······न ह्येषु प्रत्यक्षमनृषेरस्ति अतपसो वा। पौर्वापर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति।" सैषा व्यवस्था वेदार्थनिर्णयबुभुत्सुभिरवश्यं परिपालनीयेति।

वेदार्थनिर्णयजिज्ञासुभिर्यास्कशैलीं यथार्थरूपेण सम्यगाश्रणीया। तत्र अधो विन्यस्ताः केचन नियमाः सविशेषमवधानमर्हन्ति।

VIII. 3. वेदानुरोधेनैव वेदमन्त्रा व्याख्यातव्या न कर्हिचिद्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदृच्छया, स्वेच्छया वा ।

VIII. 4 यत्र खलु वेदे लङ्-लुङ्-लिटामन्यतमस्य प्रयोगः कृतस्तत्र सर्वत्रैव स सार्वकालिको बोद्धव्यः । अस्माद् हेतोरेव भगवता पाणिनिना **'व्यत्ययो बहुल'** मित्यादिसूत्रजातमातन्वताऽपि **'छन्दसि लङ्-लुङ्-लटः'**, इति सूत्रितम् । तद्यथा—**'यथापूर्वमकल्पयत्'**, इत्यादावकल्पयदित्यस्य सदैव यथापूर्वं कल्पयतीत्याद्यर्थो वेदितव्यः ।

VIII. 5 यत्र क्वापि कथांशा, आख्यानानि वाऽनुश्रूयन्ते तान्यपि सर्वाणि किञ्चिद्विज्ञानार्थप्रतिपादकानि भवन्तीति बुद्ध्वैव व्याख्येयानि ।

VIII. 6 पदपाठानुरोधेनैव पदपाठः कर्त्तव्यः । वेदानां विकारोत्सादाभ्यां परिरक्षणार्थमेव महर्षिभिः पदपाठः प्रदर्शितः । ते च पदपाठकृताः प्रतिवेदं भिन्नाः । तत्तच्छाखानुरोधेनैव प्रतिपत्तिः कर्त्तव्याः ।

IXO. वेदव्याख्यानं शाब्दिकार्थानामाधारेण तु सर्वथैवोपेक्षणीयम् । वैदिकभाषा, विचारधारा चात्यधिका विकसिता वर्तत इति तु सर्वैरेव प्राचीनार्वाचीनवेदविपश्चिद्भिः पटहनादेन उररीक्रियते, तथा च ऋषयः स्वविचाराभिव्यक्तये नेकविधान् अलङ्कारान् प्रयुञ्जते । अस्मिन् विषये महामहिमशालिनः श्रीमैक्डानलमहोदयस्य अधोविन्यस्तं वक्तव्यं विशेषरूपेण निभालनीयम्—

On the very threshold of Indian literature morethan three thousand years ago, we are confronted with a body of lyrical poetry which although for older than the literary monuments of any other branch of the Indo-European family, is already distingnished by refinement, and beauty of thought, as well as by skill in the handling of language and metre.

(A History of Sanskrit literature, 5th Ed. p. 29)

इति हेतोरेव केचन पाश्चात्यविपश्चितः वैदिकभाषाया विचार-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धारायाश्च यथार्थविकासमुपेक्षमाणा, वेदेष्वसभ्यजातेर्गीतकानि अन्विष्यमाणा नितरां यतन्ते, तैस्तु आधुनिकवैज्ञानिकपद्धतेः कुलशिरोमणेः प्रोफेसर कॉवेलमहाभागस्य निम्नाङ्कितं कथनमक्षिलक्ष्यीकृत्यैव निराशैर्भवितव्यम्—

The poetry of Rigveda is singularly deficient in that simplicity and natural pathos or sublimity which we naturally look for in the songs of an early period of Civilisation. The language and style of most of the hymns is singularly artificial.

(preface of the first edition of Griffith's English translation of the Rigveda. p. 12)

वैदिकसमये विद्यमानान् आर्यान् असभ्या (गडरिया, जंगली) इति मन्यमानैः पूर्वाग्रहे निमग्नैः पाश्चात्यविपश्चिद्भिः सह स्वासहमतिं प्रकटयन् विद्वद्वरेण्यविन्टरनिट्समहाभागः प्राह—

We need not, therefore imagine the people of tne Rigveda either as an innocent shehered people, or as a horde of rough savages, nor, on the otherhand as a people of ultra-refined culture.

(Op: cit, p. 68)

उत्तरकालीनवैदिकसाहित्यमतममुं समर्थयति यत्प्राचीनवैदिकसाहित्ये विविधेषु स्थलेषु रूपकालङ्कारस्य प्रयोगः सम्यग्ज्ञात्वैव कृतमिति निर्विशङ्कं तथा च वैदिकशब्दानां व्याख्यानं सर्वत्र शाब्दिकार्थानामाधारेण कर्त्तुं न शक्यते। तद्यथा - द्यौष्पिता तथा च तस्य दुहितुर्विषये यदालङ्कारिकं वर्णनम् ऋग्वेदे (I. 71. 5, 10, 61, -59) दृष्टिपथमवतरति, तदेव कालान्तरे प्रजापतेः तस्य दुहितृकथायां परिवर्तितम्। एवमुपरिनिर्दिष्टा राद्धान्ता अक्षिलक्ष्यीकृत्यैव वेदार्थनिर्णयः कर्त्तव्यः, इति दिक्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

न्यायवैशेषिकदर्शनानुसारेण सृष्टिनिरूपणम्

डॉ रामानुजताताचार्यः

लेखस्य सारांशः

अस्मिन् प्रबन्धे भागत्रयं भवति। प्रथमभागे न्यायदर्शनानुसारेण जगत्सृष्टिप्रकारो निरूप्यते। द्वितीयभागे वैशेषिकदर्शनानुसारेण जगत्सृष्टि-प्रकारो निरूप्यते। तृतीयभागे न्यायवैशेषिकदर्शनानुसारिजगत्सृष्टिप्रकारे वेदान्तिभिः कृतानामाक्षेपाणां परिहारप्रकारः समुपस्थाप्यते। न्यायभाष्य-वार्तिक-तात्पर्यटीकान्यायमञ्जरी-प्रशस्तपादभाष्य-कन्दली-दिनकरीग्रन्थान् पर्यालोड्य विषयसंकलनमकारि।

प्रथम भागः

आदौ न्यायदर्शनमनुसृत्य सृष्टिर्निरूप्यते। न्यायदर्शने चतुर्थेऽध्याये 'अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्' (न्या. सू. ४-१-१४) इत्यादि-सूत्रैः शून्यमेव जगदुपादानमिति मतमनूद्य दूषयित्वा,

'ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्' (न्या. सू. ४-१-१९)

'न पुरुषकर्माभावे फलानिष्पत्तेः' (न्या. सू. ४-१-२०)

'न तत्कारितत्वादहेतुः' (न्या. सू. ४-१-२१)

इति त्रिभिः सूत्रैः ईश्वरस्य जगत्कारणत्वं स्थापितम्। तथा हि पुरुषोऽयं समीहमानः नावश्यं समीहाफलमाप्नोति तेनानुमीयते पराधीना पुरुषस्य कर्मफलप्राप्तिरिति। यदि परापेक्षां विना पुरुषः कर्मफलभोगे समर्थः स्यात् न कदाचित् अफला क्रिया भवेत्। तस्मात् यदधीना पुरुषस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्मफलप्राप्तिः स ईश्वरः कारणमिति प्रथमसूत्रार्थः। ईश्वराधीना चेत् फलनिष्पत्तिः स्यात् तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येत, ततश्च कर्मलोपः स्यादित्याक्षेपपरं द्वितीयसूत्रम्। न ब्रूमः पुरुषकर्मानपेक्ष ईश्वरः कारणमिति, अपि तु पुरुषकर्म ईश्वरोऽनुगृह्णाति। फलाय यतमानस्य पुरुषस्येश्वरः फलं संपादयति। तस्मादीश्वरकारितत्वात् पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुरिति तृतीयसूत्रार्थः।

अत्र प्रकरणे वार्तिककारा उद्योतकराचार्याः महता प्रपञ्चेन ईश्वरस्य जगत्कारणत्वमुपापीपदन्। सर्वं संकलय्य संग्रहेणात्र लिख्यते। 'तत्कारितत्वात्' इति ब्रुवता सूत्रकारेण निमित्तकारणमीश्वर इत्युपगतं भवति। यच्च निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकं यथा तुरीवेमादि तन्तूनां तत्संयोगानां च। ईश्वरश्चेज्जगतो निमित्तं जगतः साक्षादुपादानकारणं किमिति चेत्—परमसूक्ष्मं परमाणुसंज्ञितं पृथिव्यादिद्रव्यमिति। परमाणुकर्माणि प्राक् प्रवृत्तेः बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवदिति। यथा वास्यादि अचेतनं बुद्धिमता तक्ष्णा अधिष्ठितं प्रवर्तते तथा अचेतनानि परमाणुकर्माणि जगत्सृष्टौ प्रवर्तमानानि बुद्धिमत्कारणाधिष्ठितान्येव प्रवर्तन्त इति।

ये परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रति ब्रूमः परमाणवः प्रवर्तमानाः सततं प्रवर्तेरन्। अथ कालविशेषापेक्षाः प्रवर्तन्ते, तन्न। कालस्याप्यचेतनत्वात् बुद्धिमन्तमधिष्ठातारमन्तरेण प्रवृत्तिर्दुर्घटा। अतोऽधिष्ठातेश्वरोऽपेक्षितः।

एवं धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः कारणत्वात् वास्यादिवत्। न चात्मैवाधिष्ठाता धर्माधर्मयोरिति वाच्यम्। न हि यस्य धर्माधर्मौ स एव तयोरधिष्ठाता भविष्यतीति युक्तम्। शरीरोत्पत्तेः प्राक् तदसंभवात्। शरीरोत्पत्तेः प्राक् अज्ञोऽयमात्मा उपलम्भयोग्यान् रूपादीनपि तावन्नोपलभते कुत उपलम्भानर्हौ धर्माधर्मावुपलप्स्यत इति। न च धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तन्तामिति वाच्यम्। धर्माधर्मयोरप्यचेतनत्वात्। न हि किंचिदचेतनं स्वतन्त्र-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तया इतराधिष्ठायकं दृष्टम् । तस्मात् जगत्सृष्टिहेतु धर्माधर्माधिष्ठातृतया ईश्वरः सिध्यति ।

ननु क्रियावतामेव कारणत्वं लोके दृश्यते । ईश्वरस्य तु क्रियाशून्यत्वान्न कारणत्वमिति चेन्न । परिस्पन्दरूपक्रियाशून्यत्वेऽपि आख्यातवाच्यज्ञानचिकीर्षाप्रयत्नरूपक्रियावत्त्वादीश्वरस्य कारणतोपपत्तेः । किंच परिस्पन्दरूपक्रियाशून्यानामपि कारणत्वं लोके दृश्यते । यथा कदाचित् द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते संयोगात् निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्ते इति निष्क्रियाणामारम्भकत्वम् । उत्पन्नक्रियेषु क्रियोपरतौ द्रव्योत्पत्तेरिदमुदाहरणम् । क्वचित् अनुत्पन्नक्रियेष्वपि द्रव्येषु पूर्वद्रव्योपरतौ द्रव्यान्तरोत्पादो दृश्यते यथा एकावयवविभागे द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि द्रव्यमारभन्त इति । कानिचित् पुनः क्रियावन्त्यारभन्ते यथा अन्यतरकर्मजात् नोदनात् संयोगात् निवृत्ते कर्मणि इतरस्मिन् द्रव्ये द्रव्यमुत्पद्यत इति ।

ननु ईश्वरश्चेत् कर्ता स किं सापेक्षः करोति उत निरपेक्षः ? यदि सापेक्षः यदपेक्षः करोति तस्याकर्तेति कृत्वा अन्यत्राप्यकर्तृत्वप्रसङ्गः । अथायं किंचिदनपेक्ष्य करोति तदा पुरुषकर्मणो वैफल्यं स्यात् इति चेत्— न । नायं नियमोऽस्ति यो येन करोति स तन्न करोतीति । यथानेकशिल्पनिपुणः पुरुषः कारणान्तरसापेक्षः वास्यादि करोति, वास्यादिसापेक्षः दण्डादि करोति दण्डादिसापेक्षो घटादि । न च पर्यायेण कर्तृत्वे सति अकर्तृत्वम् । तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखदुःखादि, आत्ममनःसंयोगशुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ, सुखदुःखस्मृत्यपेक्षः तत्साधनापेक्षश्च शुद्धमशुद्धं चाभिसन्धिमिति । यदा करोति तदा साधनस्याकर्तेति चेत्, न ब्रूमो वयं सर्वार्थानयमेकस्मिन् काले करोतीति । अपि तु पर्यायेण । पर्यायकर्तृत्वे च नायं दोषः ।

अथायमीश्वरः कुर्वाणः किमर्थं करोति । लोके हि ये कर्तारो भवन्ति ते किंचिदुद्दिश्य कुर्वन्ति इदमाप्स्यामि इदं हास्यामि चेति । न तावदीश्व-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रस्य हेयमस्ति, दुःखाभावात् । नोपादेयमस्ति, आप्तकामत्वात् । केचिद्वदन्ति क्रीडार्थमीश्वरः करोतीति । तन्न युक्तम् । क्रीडा हि नाम विना क्रीडया रतिमविन्दतां रत्यर्थं भवति । न च रत्यर्थी भगवान्, दुःखाभावात् । दुःखिनो हि सुखोपभोगार्थं क्रीडन्ति । विभूतिख्यापनार्थं सृजति, सृष्ट्या हि विश्वरूपत्वं ख्यापितं भवतीति केचिदाहुः । तदपि न युक्तम् । नहि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते, न वा विभूत्यख्यापनेन किंचिद् हीयते । अतः किमर्थमीश्वरः सृजतीति चेत्—अत्रोच्यते । यथा भूम्यादीनि धारणादिक्रियां स्वाभाव्यात् कुर्वन्ति, तथेश्वरोऽपि स्वाभाव्यात् प्रवर्तते प्रवृत्तिस्वभावकत्वादीश्वरस्येति न कोऽपि दोषः । यदि स्वाभाव्यात् प्रवतते सततं प्रवर्तताम्, तथा च निवृत्तिर्न युज्यत इति चेत्—ईश्वरस्य बुद्धिमत्त्वात् धर्माधर्म सापेक्षत्वाच्च न सततं प्रवृत्तिरिति । एवमादिरीत्या जगत्सृष्टौ निमित्तकारणमीश्वर इति पक्षे संभवन्तो दोषा यथासंभवं परिहृताः ।

न्यायमञ्जर्यां जरन्नैयायिकैः जयन्तभट्टैः सृष्टिप्रकारनिरूपणमित्थं कृतम्—पार्थिवम् आप्यं तैजसं वायवीयम् इति चतुर्विधमिदं कार्यं स्वावयवाश्रितमुपलभ्यते । तत्र यथा घटः सावयवः कपालेष्वाश्रितः एवं कपालान्यपि सावयवत्वात् स्वावयवेष्वाश्रितानि, तदवयवा अपि तदवयवान्तरेषु इत्येवं द्व्यणुकपर्यन्ताः स्वावयवाश्रिताः । यत्र यावतः कार्यजातस्य स्वावयवाश्रितस्य प्रत्यक्षेण ग्रहणं तत्र तदेव प्रमाणम् । अन्यत्रानुमानम् । यस्य तु कार्यस्य स्वावयवाश्रितत्वं प्रत्यक्षेण न गृह्यते तस्य त्र्यणुकस्य च द्व्यणुकस्य च सावयवत्वमनुमानेन साधनीयम्—त्र्यणुकं स्वावयवाश्रितं सावयवत्वात् परिदृश्यमानकार्यवत् निरवयत्वे तु तस्य परमाणुत्वमेव परमाणुषु तु सावयवस्वस्य हेतोरसिद्धत्वात् नावयवान्तरकल्पना । एवम् उत्पत्तिक्रमवत् विनाशक्रमेणापि परमाणवोऽनुमीयन्ते । लोष्टस्य प्रविभज्यमानस्य भागाः तद्भागानां भागान्तराणीत्येवं तावत् यतः परमवयव विभागो न भवति ते परमाणव उच्यन्ते ।

अत्र हि त्रयी गतिः । अस्य घटादेः कार्यस्य निरवयवत्वमेव वा अव-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यवानन्त्यं वा परमाण्वन्तता वा । तत्र निरवयवत्वमनुपपन्नम् । पटे अवयवानां तन्तूनां घटे च कपालानां प्रत्यक्षमुपलम्भात् । अनन्तावयवयोगित्वमपि न युक्तम्, मेरुसर्षपयोरनन्तावयवयोगित्वेन तुल्यपरिमाणत्वप्रसङ्गात् । तस्मात् परमाण्वन्ततैव युक्तिमती ।

त इमे परमाणवोऽचेतनत्वात् चेतनेच्छाधीनं प्रेरणमन्तरेण विशिष्टक्रमयुक्तमितरेतरसंयोगमलभमानाः कार्यसिद्धये नालम् । अत एषामधिष्ठाता चेतनः सकलभुवन निर्माणनिपुणमतिरीश्वरोऽङ्गीकृतः । न च सर्वे परमाणवः सकृदेव निर्वर्त्यमानकार्यपरिमाणानुगुणसंख्याकाः एकत्र संयुज्य घटादिकार्यमारभन्ते, किं तु द्व्यणुकादिक्रमेण । सकृदारम्भे हि कुम्भे भज्यमाने कपालशर्कराकण चूर्णादिक्रममपहाय प्रथममेव परमाण्वन्तता भवेत् । सर्वसंयोगस्य सर्वविभागेन सहसैव विनाशात् । अतश्च कर्परादिक्रमदर्शनं विरुध्येत । अविनष्टेऽपि पटादौ तन्त्वाद्यवयवाश्रितत्वमुपलभ्यमानं कथं वा समर्थ्येत । परमाणूनामप्रत्यक्षत्वेन तदाश्रितत्वस्य ग्रहीतुमशक्यत्वात् । परमाणूनां पटस्य च मध्ये कार्यान्तराभावादिति । तस्मात् द्व्यणुकादिक्रमेण परमाणवः कार्यमारभन्ते ।

ननु द्वावेव परमाणू प्रथमं संयुज्येते इत्यत्र का युक्तिः ? बहुत्वसंख्यायाः महत्परिमाणकारणत्वदर्शनात् त्रिषु परमाणुषु प्रथमं मिलत्सु तद्गतबहुत्वसंख्यया तत्कार्ये महत्त्वे जाते तस्य प्रत्यक्षत्वं प्रसज्येत । न च तस्य प्रत्यक्षता, अतिसूक्ष्मत्वात् । अतः द्वाभ्यां परमाणुभ्यां द्व्यणुकमादावुत्पद्यते । तच्च परमाणुवत् अप्रत्यक्षमेव, महत्त्वानुत्पादात् । तर्हि द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकारम्भोऽस्तु, कुतस्त्रिभिर्द्व्यणुकैस्त्र्यणुकारम्भ इष्यत इति चेत्—न । द्व्यणुक इव तत्रापि महत्वोत्पत्तौ कारणाभावात् । अतः त्रिभिः द्व्यणुकैः त्र्यणुकमारभ्यते । द्व्यणुकगतबहुत्वसंख्यया त्र्यणुके महत्त्वमारभ्यते, अतस्तस्य प्रत्यक्षता भवति । त्र्यणुकानन्तरं तु अल्पपरिमाणादवयवात् महापरिमाणोऽवयवी भवतीति नियमः न त्ववयवसंख्यानियमः ।

ननु परमाणव एव प्रथमं द्व्यणुकमुत्पाद्य तदनु त एवोत्तरोत्तरकालं कार्याण्युत्पादयन्तु इति चेत्—न । तथा सति उत्तरोत्तरकार्योत्पत्तौ पूर्वपूर्व-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्यानपायात् मूर्तानामेकदेशत्वं स्यात् । न च तत् दृश्यत इति यथोक्त एव क्रमः श्रेयान् ।

तदेवमनेकात्मसमवेतधर्माधर्मसंस्कारपरिपाकानुरूपेण प्रसरन्त्या ईश्वरेच्छया प्रेर्यमाणानां परमाणूनां क्रियाभिः क्रमशः द्व्यणुकादिकार्यक्रमेण जगत्सृष्टिः इति ।

नन्वीश्वरः किं सशरीरः जगत् सृजति अशरीरो वा । न तावदशरीरः, लोके अशरीरस्य कर्तृत्वादर्शनात् । सशरीरश्चेत् शरीरत्वात् चैत्रादिशरीरवत् उत्पत्तिमत् तच्छरीरं तदीश्वरकर्तृकं वा स्यादीश्वरान्तरकर्तृकं वा ? आद्ये सशरीरं स्वशरीरं सृजति अशरीरो वा ? आद्ये आत्माश्रयः । द्वितीये पूर्वोक्तदोषः (लोके तथाऽदर्शनादिति) ईश्वरान्तरकर्तृकं चेत् ईश्वरानन्त्यप्रसङ्ग इति ।

अत्रोच्यते । अशरीर एव स्रष्टेति । लोके तथा न दृष्टमिति यदुक्तम्, तन्न । कर्तृत्वं ज्ञानचिकीर्षाप्रयत्नवत्त्वम् । तच्चाशरीरस्यापि संभवति । स्वशरीरप्रेरणे च दृष्टमात्मनः अशरीरस्य कर्तृत्वम् ।

ननु किमीश्वरः कुलालादिरिव सव्यापारो जगत् सृजति निर्व्यापारो वा ? आद्ये सृज्यानामानन्त्यात् युगशतैरपि जगत्सृष्टिर्नोपपद्यते । द्वितीये अचेतनाः परमाणवः कथमीश्वरेच्छामनुसरेयुरिति चेन्न । इच्छामात्रेण कर्तृत्वात् अनेकव्यापारनिर्वर्तनोपात्तक्लेशादेरप्रसक्तेः । अचेतनं स्वशरीरं यथा आत्मेच्छामनुवर्तते तथा अचेतनाः परमाणवः ईश्वरेच्छामनुवर्त्स्यन्ति ।

नन्ववाप्तसमस्तकाम ईश्वरः किं प्रयोजनमभिसन्धाय जगत् सृजति ? स्वभाव एवैष भगवतः यत् कदाजित् सृजति कदाचित् संहरति विश्वमिति । अथ वा अनुकम्पया सृष्टिसंहारौ करोति । नन्वनुकम्पया सृजन् सुखस्वभावमेव सृजेत् । न । प्राणिकर्मणां सहकारित्वादिति ।

अत्रेदमालोचनीयम् । सर्वं कार्यद्रव्यं घटपटगृहगोपुरादिकं स्वापेक्षया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निकृष्टपरिमाणस्वगतरूपादिसजातीयरूपादिशालिनानाद्रव्यारब्धं दृष्टम्। एवं च जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः स त्रसरेणुरपि तादृशद्रव्यारब्ध इत्यनुमीयते। न च तस्य कार्यत्वमसिद्धम्। परिच्छिन्नमहत्त्ववत्तया कार्यत्वानुमानात्। महत्त्वं च चाक्षुषद्रव्यत्वात् सिद्धम् त्रसरेणु महत्त्वं च नावयवमहत्त्वजन्यम्, तेषामप्रत्यक्षत्वेनामहत्त्वात्। किं तु अवयवबहुत्वाधीनम्। अतस्त्रीणि द्व्यणुकानि त्रसरेणोरवयवाः समवायिकारणानि। द्वयोः कारणत्वे अवयवबहुत्वाभावेन महत्त्वासंभवात्। तत्र कपालद्वयात्। घटवत् परमाणुद्वयादपि कार्यसंभवात् तन्निषेधे प्रमाणाभावात् द्व्यणुके स्वीकर्तव्ये त्रसरेणौ महत्त्वोपपादनाय त्रिभिर्द्व्यणुकैः त्रसरेणोरुत्पत्तिः कल्प्यते। इयं न्यायदर्शने प्रतिपादिता रीतिः।

द्वितीय भागः

वैशेषिकसूत्रेषु न तथा सृष्टिप्रकारः स्पष्टमुक्तो यथा प्रशस्तपादभाष्ये इति भाष्यानुसारेण सृष्टिप्रलयप्रकारः कथ्यते।

अस्माकं पञ्चदशनिमेषाः काष्ठा। विंशतिः काष्ठाः कला। पञ्चदश कलाः नाडिका। त्रिंशत्कलो मुहूर्त्तः। त्रिंशता मुहूर्तैरहोरात्रः। पञ्चदशाहोरात्राः पक्षः। द्वौ पक्षौ मासः। द्वौ मासावृतुः। षडृतवो द्वादश मासाः संवत्सरः। ऋतुत्रयेणोत्तरायणम्। ऋतुत्रयेण दक्षिणायनम्। उत्तरायणं च देवानां दिनम्, दक्षिणायनं रात्रिः। तथाभूताहोरात्रशतत्रयेण षष्ट्यधिकेन वर्षम् द्वादशसहस्रैश्च वर्षैश्चतुर्युगम्। चतुर्युगसहस्रेण ब्रह्मणो दिनमेकम्। इत्यनेन मानेन वर्षशतस्यान्ते, वर्तमानस्य ब्रह्मणो मुक्तिकाले संसारे नानास्थानेषु भूयोभूयः शरीरादिपरिग्रहेण खिन्नानां गर्भवासादिविविधदुःखेन दुःखितानां प्राणिनां कंचित्कालं विश्रामार्थं (दुःखोपशमार्थं) सकलभुवनपतेः महेश्वरस्य संजिहीर्षा भवति। तदनन्तरं शरीरेन्द्रियमहाभूतारम्भकाणां सर्वेष्वात्मसु समवेतानामदृष्टानां शक्तिप्रतिबन्धः स्यात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मिन् सति अनागतानां शरीरेन्द्रियमहाभूतानामनुत्पत्तिः। उत्पन्नानां च विनाशार्थं महेश्वरेच्छया आत्मनां परमाणूनां च संयोगेभ्यश्च परमाणुषु क्रियाः जायन्ते। ततः शरीराणामिन्द्रियाणां च ये परम्परयाकारणभूताः परमाणवः तेषु विभागा भवन्ति। विभागेभ्यस्तेषामणूनां संयोगा निवर्तन्ते। संयोगनिवृत्तौ सत्यां तेषामापरमाण्वन्तो नाशः। एवमेव पृथिव्यप्तेजोवायूनामपि अनेनैव क्रमेण उत्तरस्मिन्नुत्तरस्मिन् सति पूर्वं पूर्वस्य विनाशः। जले तिष्ठति पूर्वं पृथिव्या विनाशः, तेजसि तिष्ठति जलस्य, वायौ तिष्ठति तेजसः। ततः प्रविभक्ताः परमाणवः अवतिष्ठन्ते। धर्माधर्म भावनाख्यसंस्कारैश्चानुविद्धा आत्मानश्च ब्रह्मणो वर्षशतं यावदवतिष्ठन्ते। अयं संहारक्रमः।

ततः पुनः आत्मनां सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा जायते। ततः सर्वेष्वात्मसु विद्यमानानि अदृष्टानि वृत्तिं लभन्ते। तदपेक्षेभ्यः आत्मपरमाणुसंयोगेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते। पवनपरमाणवस्तत्र समवायिकारणम्। लब्धवृत्त्यदृष्टवदात्मपरमाणुसंयोगोऽसमवायिकारणम्। अदृष्टं निमित्तकारणम्। एवं कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगेभ्यश्च द्व्यणुकानि जायन्ते, तदनु त्र्यणुकानीत्यनेन क्रमेण महान् वायुः समुत्पद्यमानः आकाशे दोधूयमानो वेगातिशययुक्तस्तिष्ठति। तदनन्तरं तस्मिन्नेव वायौ आप्येभ्यः परमाणुभ्यः द्व्यणुकादिक्रमेण महान् सलिलनिधिरुत्पन्नः सर्वत्र पोप्लूयमानस्तिष्ठति। ततस्तस्मिन्नेव जलधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी समुत्पन्ना स्थिरस्वभावावतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशिः देदीप्यमानस्तिष्ठति। यद्यपि पयःपावकयोः स्वाभाविको विरोधस्तथाप्यदृष्टवशेनाधाराधेयभावः।

एवमुत्पन्नेषु महाभूतेषु महेश्वरस्य संकल्पमात्रात् पार्थिवपरमाणुसहितेभ्यस्तैजसेभ्यः परमाणुभ्यः महदण्डमारभ्यते। तस्मिन्नण्डे चतुर्वदनकमलं सर्वलोकपितामहं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्मा अतिशयितज्ञानवैराग्यैश्वर्यसंपन्नः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राणिनां कर्मविपाकं विदित्वा कर्मानुगुणज्ञानभोगायुषः सुतान् दक्षादीन् प्रजापतीन् मानसान् मनस्संकल्पप्रभवान् मनून् देवान् ऋषीन् पितृगणान्, मुखबाहूरुपादतश्चतुरो वर्णान् अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि च भूतानि सृष्ट्वा कर्मानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैर्योजयति। इत्ययं सृष्टिक्रमः।

अत्र युक्तिरेषा परमाणुसद्भावे ततो जगत्सृष्टौ चोक्ता कन्दल्याम्— अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाण-तारतम्यवत्। यत्रेदं विश्रान्तं यतः परमणुर्नास्ति स परमाणुः। स चैको न जनकः। एकस्य नित्यस्य चारम्भकत्वे कार्यस्य सततोत्पत्तिः स्यात् अपेक्षणी-याभावात्। अविनाशित्वं च प्रसज्येत। आश्रयविनाशस्य अवयवविभागस्य विनाशहेतोरभावात्। त्रयाणां परमाणूनामारम्भकत्वं च न संभवति। महत्कार्यद्रव्यस्योत्पत्तौ स्वपरिमाणापेक्षया अल्पपरिमाणस्य **कार्यद्रव्यस्यैव** सामर्थ्यदर्शनात्। त्र्यणुकं कार्यद्रव्येणैव जायते महत्परिमाणत्वात् घटवत्। इत्थं च त्रयाणामेकस्य चारम्भकत्वे प्रतिक्षिप्ते द्वाभ्यामेव परमाणुभ्यामार-भ्यते यत् तत् द्व्यणुकमुच्यते। द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकोत्पत्तौ त्र्यणु-कस्य महत्त्वं न स्यात्, अवयवबहुत्वस्यापेक्षितत्वात्। अतस्त्रिभिर्द्व्यणुकै-स्त्र्यणुकमिति। न चैवं सति द्व्यणुकानामेव घटारम्भकत्वापत्तिः। घटस्य भङ्गेऽल्पतरतमादिभावदर्शनेन तथैवारम्भकत्वात्। अतस्त्र्यणुकादिक्रमेण घटाद्युत्पत्तिः।

एतेन दिनकर्याम् "अत्रेदं चिन्त्यम्—त्रिभिः परमाणुभिरेव त्र्यणुकम-स्तु। परमाणुभ्यामनारम्भस्तु सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात्। फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भकसंयोगकल्पनात्" इति यदुक्तं तत्समाहितं भवति।

तृतीयो भागः

न्यायवैशेषिकदर्शनसंमतेऽस्मिन् ईश्वराधिष्ठितेभ्यः परमाणुभ्यो जगत्सृष्टिरिति पक्षे वेदान्तिभिरुद्भावितान् दोषानिदानीं पर्यालोचयामः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्ममीमांसायां तर्कपादाख्ये द्वितीयाध्यायद्वितीयपादे—

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्
उभयथापि न कर्मातस्तदभावः
समवायाभ्युपगमाच्च साम्यादनवस्थितेः
नित्यमेव च भावात्
रूपादिमत्त्वाच्च विपर्ययो दर्शनात्
उभयथा च दोषात्
अपरिग्रहाच्चात्यन्तमनपेक्षा

इति सप्तभिः सूत्रैः वैशेषिकमतं दूषितम् । तत्र शांकरभाष्ये महद्दीर्घवद्वेति प्रथमसूत्रम् अणुवादिना ब्रह्मवादिनि उत्प्रेक्ष्यमाणस्य दोषस्य प्रतिसमाधानपरतया व्याख्यातम् । 'उभयथापि न कर्मातस्तदभावः' इति द्वितीयं सूत्रं परमाणुकारणवादनिरासपरतया व्याख्यातम् । तथाहिप्रलयकाले विभागावस्थानां तावत् परमाणूनां संयोगः कर्मापेक्षोऽभ्युपगतः कर्मवतां तन्त्वादीनां संयोगदर्शनात् । कर्मणश्च निमित्तं तस्यामवस्थायां प्रयत्नाभिघातादेरसंभवात् अदृष्टमेवेत्यभ्युपगतम्—'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि' (वै. सू.) इति वदद्भिः । तत्र पृच्छामः किमात्मसमवेतमदृष्टं परमाणुष्वाद्यकर्मणो निमित्तमुत परमाणुसमवेतम् । उभयथापि नादृष्टनिमित्तकमणुषु कर्मावकल्पते, अदृष्टस्याचेतनवात् । न ह्यचेतनं चेतनानधिष्ठितं स्वतन्त्रं प्रवर्तत । आत्मनश्च तस्यामवस्थायामचेतनत्वाभ्युपगमात् । किं चात्मसमवेतमदृष्टमणुषु कथं कर्मोत्पादयेत् । कार्यकारणयोः सामानाधिकरण्यस्यावश्यकत्वात् । आत्म समवेतमदृष्टं स्वाश्रयसंयोगसंबन्धेनाणुषु संबध्यमानं कर्मोत्पादयतीति चेत् न । संयोगस्य सातत्यात् प्रवृत्तिसातत्यप्रसङ्गात् ।

किं च परमाणूनां परस्परं संयोगो न घटते । एकस्य परमाणोरन्येन परमाणुना सह किं कात्स्न्येन संयोगः किं वा एकदेशेन । नाद्यः उपचयानु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पपत्तेरणुमात्रत्वप्रसङ्गात् । दृष्टविपर्ययाच्च । प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात् । द्वितीये परमाणूनां सावयवत्वप्रसङ्गः । ततश्च संयोगरूपासमवायिकारणाभावात् द्व्यणुकादिकार्यद्रव्यं नोत्पद्येत ।

यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां संभवति एवं महाप्रलयेऽपि बिभागोत्पत्त्यर्थं कर्म नैवाणूनां भवेत् । अदृष्टं हि भोग प्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमित्यतो निमित्ताभावात् न स्यादणूनां विभागार्थमपि कर्मेति ।

अत्र समाधानप्रकार एवम्—अदृष्टवशादेव परमाणुष्वाद्यं कर्म । अदृष्टं तु यद्यपि चैतन्यशून्यैर्जीवात्मभिः प्रलयकाले नाधिष्ठीयन्ते, तथापि ईश्वरेणाधिष्ठीयन्त इत्यभ्युपगमान्नानुपपत्तिः । अदृष्टाधिष्ठातृताया अपि ईश्वरसाधकयुक्तिष्वन्यतमतया न्यायवार्तिककुसुमाञ्जल्यादावुक्तत्वात् । यदत्र भामत्यामुक्तम्-निमित्तकारणतामात्रेण त्वीश्वरस्याधिष्ठातृत्वमुपरिष्टान्निराकरिष्यते इति । तत्रोच्यते । 'पत्युरसामञ्जस्यात्' इत्यधिकरणोक्तानि दूषणानि भामतीकारहृद्गतानि । तानि च किमशरीर ईश्वरः सृजति उत सशरीर इत्यादिदूषणानि न्यायवार्तिके समाहितानि पूर्वमस्माभिरनूदितानि चेति न पुनः प्रतन्यते ।

संयोगविषये यद्दूषणमुक्तम्, तस्यापि विपक्वादृष्टावच्छिन्नात्मसंयोगस्य सततमविद्यमानत्वात् न सृष्टिसातत्यादिप्रसङ्ग इति परिहारः ।

'समवायाभ्युपगमाच्च साम्यादनवस्थितेः' इति सूत्रे—द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानम् अणुभ्यामत्यन्तभिन्नमण्वोः समवैतीति भवताङ्गीक्रियते । यथैव ह्यणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायलक्षणेन संबन्धेन ताभ्यां संबध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् अन्येनैव समवायेन समवायिभिः संबध्येत, अत्यन्तभेदसाम्यात् । तथा च तस्य तस्यान्योऽन्यः संबन्धः कल्पयितव्य इत्यनवस्था प्रसज्यते । तस्मादनुपपन्नः परमाणुकारणवाद इति भगवत्पादैरुक्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समवायमधिकृत्य पृथगेव वक्तव्यमस्ति बहु। प्रकृतविषये तस्यनातीवोपकार इति विरम्यते।

'नित्यमेव च भावात्' इति सूत्रे—अणवः किं प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वा। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वे नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभावत्वं च विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरङ्गीकार्यतया तन्निमित्तमदृष्टमेवेति अदृष्टस्य नित्यसंनिधानान्नित्यप्रवृत्तिप्रसङ्गः। अदृष्टस्यानिमित्तत्वे नित्याप्रवृत्तिप्रसङ्गः। तस्मादप्यनुपपन्नः परमाणुकारणवाद इति भगवत्पादैर्भाषितम्।

अत्र प्रशस्तपादाचार्यैरेवं समाहितम्—परमेश्वरेच्छावशात् प्रलयकालेऽदृष्टं प्रतिबद्धशक्तिकम्, सृष्टिकाले च लब्धवृत्तिकं भवतीति स्वीकारान्न सर्वदा प्रवृत्तेर्न वा सर्वदा निवृत्तेः प्रसङ्ग इति। अथवा ब्रह्म कारण वादेऽप्येवं विकल्पे ब्रह्म स्वेच्छायां सत्यां प्रवर्तते इतरथा निवर्तत इति हि वक्तव्यम्। तथा ईश्वरेच्छया कालविशेषे प्रवर्तन्ते निवर्तन्ते च परमाणव इति तुल्यमुत्तरम्।

'रूपादिमत्त्वाच्च विपर्ययो दर्शनात्' इति सूत्रे रूपादिमतां घटादीनां स्वकारणापेक्षया स्थूलत्वस्य, अनित्यत्वस्य च दर्शनात् रूपादिमतां परमाणूनामपि स्वकारणापेक्षया स्थूलत्वस्य अनित्यत्वस्य च प्रसङ्ग इति भाषितम्।

अत्रैवं समाधानम्—अनवस्थाभयात् अवयवपरंपरायाः परमाणौ विश्रान्तत्वे सति रूपादिमत्त्वं न स्थूलताया अनित्यत्वस्य च प्रयोजकम्, अपि तु अवयवबहुत्वादेः स्थूलतायां प्रयोजकत्वम्, अवयवनाशावयवसंयोग विनाशयोश्च अनित्यत्वे प्रयोजकत्वमिति स्वीकारान्न दोष इति।

अथ रामानुजभाष्योक्तदूषणान्यालोचयेमहि। अदृष्टकारितेन कर्मणा संयुज्यमानाभ्यां निरवयवाभ्यां परमाणुभ्यां द्व्यणुकाद्युत्पत्तिक्रमेण जगदु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत्तिकल्पनेयं न युज्यते । परमाणूनां निरवयवत्वे संयोगासंभवात् यथाङ्गुलिद्वयं प्रत्येकं दशदिक्संबन्धिदशप्रदेशावच्छिन्नं परस्परं संयुज्यमानमेकया महादिशा विदिग्द्वयेन चावच्छिन्नैः प्रत्येकं त्रिभिस्त्रिभिः प्रदेशैः संयुज्यते इत्येवं षड्भिः पार्श्वैः संयुज्यते, एवं पटारम्भकाः तन्तवः संयुज्यमानाः षड्भिः पार्श्वैः संयुज्यमानाः प्रत्येकमसंयुक्त सप्तपार्श्वयुक्ताः सन्तः स्वाधिकपरिमाणं पटमारभन्त इति दृष्टम् । एवं परमाणवोऽपि षड्भिः पार्श्वैः संयुज्यमाना एव पारिमाण्डल्याख्यस्वपरिमाणाधिकपरिमाणम् अणुत्वह्रस्वत्वयुक्तद्व्यणुक-महत्त्वदीर्घत्वयुक्तत्र्यणुकादिकार्यमारभन्त इति वक्तव्यमिति परमाणूनां प्रदेशभेदोऽवश्यमङ्गीकरणीयः । तथा त्र्यणुकोत्पादकद्व्यणुकत्रयसंयोगनिर्वाहार्थमपि सोऽभ्युपेयः । स हि हस्त पुस्तकसंयोगात् कायपुस्तकसंयोग इव द्व्यणुकावयव परमाणुद्व्यणुकान्तर-संयोगात् द्व्यणुकद्वयसंयोग इति वक्तव्यम् । कारणाकारणसंयोगात् कार्याकार्यसंयोग इति त्वयाभ्युपगमात् तथा च द्व्यणुकारम्भकपरमाणौ तदारम्भकपरमाण्वन्तरसंयोगे स्थिते प्रदेशभेदं बिना कथं त्र्यणुकोत्पत्ति-समये द्व्यणुकान्तर संयोगः स्यात् मूर्तानां समानदेशताविरोधात् । यदि तु मूर्तत्वेऽपि परमाणुषु समानदेशता नेष्यते, तदा षण्णां परमाणूनां पिण्डरूपं त्र्यणुकं परमाणु परिमाणमेव भवेत् । तदाहुः—

षट्केनयुगपद्योगात् परमाणोः षडंशता ।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥

इति । प्रागादिचतुर्दिगूर्ध्वाधोदेशवर्तिभिः षड्भिः परमाणुभिः संबध्यमानो मध्यस्थः परमाणुः षडंशः प्राप्नोति । भिन्नदेशत्वात् संबन्धानाम् । अथ समानदेशाः सर्वे संबन्धाः तदा सर्वेषामेषां पिण्डः परमाणुमात्रः प्राप्नोतीति तदर्थः । समानमिदं दूषणं द्व्यणुकेभ्यस्त्र्यणुकोत्पत्तावपि ।

तस्मात् द्व्यणुकत्र्यणुकादिजनन-तत्परिमाणातिशययोः सिद्ध्यर्थं परमाणुषु षडंशत्वमनिच्छतापि अङ्गीकार्यम् । अथ सांशत्वेऽनवस्थेति बिभेषि तर्हि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परमाणुकारणवादं परित्यज्य ब्रह्मकारणवादं परिगृहाण । इति मुख्यं दूषणं रामानुजमतीयग्रन्थेषु प्रत्यपादि ।

अत्र समाधानम्—सावयवाः पदार्था यदा संयुज्यन्ते तदैव षट्पार्श्वावश्यकता । निरवयवास्तु प्रदेशभेदं विनापि संयोगं प्राप्नुवन्ति । अन्यथा निरवयवे ब्रह्मणि कथमितरद्रव्यसंयोगा भवन्तीति चोद्ये कः परिहारः । उक्तं हि न्यायसिद्धाञ्जने—

> "एवमारम्भकाणामणूनां कृत्स्नैकदेशसंयोगविकल्पेन अधिकपरिमाणद्रव्यानारम्भकत्वसभागत्वादि चोद्यं परमाणुदूषकैः सर्वैरपि क्रियते । भाष्यकारैश्च महद्दीर्घाधिकरणे तदेव चोद्यं कृतम् । तदेतन्माध्यमिकानामेवोपपद्यते । न त्वन्येषाम् ।……कथं तर्हि भाष्यम् ? दृश्यमानातिरिक्तकल्पनानिरासाभिप्रायम् ।"

इति । अपि च सिद्धान्ते परमाणुस्थानीयं त्र्यणुकं निरवयवम्, महत्त्वशून्यमपि तत् उद्भूतरूपवत्त्वादेव प्रत्यक्षमिति स्वीक्रियते । तथा सति ब्रह्मत्र्यणुकयोर्निरवयवयोः कथंसंयोग इति प्रश्नः कथं समाधेयः ।

अतः परमाणुकारणवादोऽपि न्यायवैशेषिकदृष्ट्या समीचीन एव ।

इति शम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याप्तिपञ्चकशतकोटिः

(गुम्मलूरि सङ्गमेश्वरशास्त्रिविरचितः)

विज्ञापनम्

गब्बिट आञ्जनेय शास्त्री

(गौतमः) न्यायव्याख्याता, तिरुपति विद्यापीठम्

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेतीमाश्चतस्रोविद्याः प्राणभृतामनुग्रहाय महर्षिभिरुपदिष्टाः। तत्रान्वीक्षिकी न्यायशास्त्रं, न्यायविद्या, वाकोवाक्यम् इत्यादिशब्दैः व्यपदिश्यमाना प्राचीननवीनभेदेन विस्तारमगमत्। उदयनमारभ्यतत्पूर्वं प्रवृत्तस्य शास्त्रस्य प्राचीनन्यायशास्त्रमिति गङ्गेशमारभ्यप्रवृत्तस्य शास्त्रस्य नव्यन्यायशास्त्रमिति च व्यपदेशस्समभवत्। गङ्गेशरचितस्य चिन्तामणेः मथुरानाथतर्कवागीशः रहस्यनामकं व्याख्यानं निरमात्। तन्मणेस्तत्वं सुगमावबोधकं सत् न्यायशास्त्रव्युत्पित्सूनां व्युत्पत्तये महदुपकरोति। तस्यैव व्याप्तिपञ्चकरहस्यस्य विजयनगरसंस्थानास्थानविदुषां महाराजसंस्कृतकलाशालायां न्यायशास्त्रप्राध्यापकानां प्रकाण्डपण्डितानां गुम्मलूर्युपनामकसङ्गमेश्वरशास्त्रिणां कृतिः शतकोटिनामकं क्रोडपत्रं आन्ध्रदेशस्थैः प्राच्यैरौदीच्यैश्च व्युत्पित्सुभिः विद्वद्भिश्चासेव्यते पठनपाठनादिना। तदनुसमधिगम्यते शास्त्रे व्युत्पत्तिः कीर्तिश्च। अस्य पठनपाठनसम्प्रदाय आन्ध्रदेशे एकत्रैव वर्तते। तत्रापि विजयवाटिकायां काञ्चीकामकोटिपीठाधिप श्री श्री श्री जगद्गुरुजयेन्द्रसरस्वतीप्रतिष्ठापिततर्कवेदान्तपाठशालायामध्यापकानां अस्मद्गुरुचरणानां तर्कवेदान्तसम्राडित्यादिबहुबिरुदभाजां ब्रह्मश्रीमद्दुलपल्लिमाणिक्यशास्त्रिणां सविध एव। तस्यास्य बहुविधोपकारकस्यक्रोडपत्रस्य प्रकाशनं न्यायशास्त्राभिमानिनां सर्वेषामपि मुदावहंभवतीति शम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीरामाह्वय एव रक्तमनसां स्वस्मिन् भवद्वेषिणाम्
रामोऽभून्मुनिमानसार्दनकृतां भीमोऽभवद्रक्षसाम् ।

रामो भीम इति द्वयञ्च दधते नाम्नोर्जनामोदनात्
रामायैव समस्तवेदशिरसां तत्त्वाय तस्मै नमः ॥

न तावदित्यारभ्य विभावनीयमित्यन्त माथुरी । तस्यायमाशयः । व्याप्तिरव्यभिचरितत्वशब्दप्रतिपाद्यभिन्ना । साध्याभाववदवृत्तित्वरूपाव्यभिचरितत्वशब्दप्रतिपाद्यभेदसाध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपाव्यभिचरितत्वप्रतिपाद्यभेदादिरूपविशेषभेदकूटवत्त्वात् इत्यनुमानं मूलाभिप्रेतम् नाऽस्याप्रयोजकत्वम् । यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति सामान्यतो गृहीतव्याप्तेरुक्तकूटात्मकहेतौ सत्वादिति ।

अथात्र किमिदं पक्षतावच्छेदकव्याप्तित्वम् । न तावद्धेतुव्यापकसाध्यसामानाधिकरण्यत्वम् । तदवच्छिन्नेऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदनिश्चयात् सिद्धसाधनप्रसङ्गात् । नापि साध्याभाववदवृत्तित्वत्वादिकं तदवच्छिन्नेऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद रूपसाध्यस्य विरहेण बाधप्रसङ्गादिति चेत्, न । न व्यापकसामानाधिकरण्यत्वरूपं व्याप्तित्वं प्रकृते विवक्षितमुक्तदोषसंभवात् । किन्तु अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारतावत्वमेव । तथा चाव्यभिचरितत्वशब्दप्रतिपाद्यविशिष्टहेतुमत्ताज्ञानस्य अनुमितिजनकत्वं वा व्यापकताघटितव्याप्तिविशिष्टहेतुमत्ताज्ञानस्यानुमितिजनकत्वं वेति संशयात् अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारतावच्छिन्ने अव्यभिचरितत्वशब्दप्रतिपाद्यभेदस्संदिग्ध इति न सिद्धसाधनं न वा बाध इति । न च साध्याभाववदवृत्तित्वादिप्रत्येकव्याप्तिविशिष्टहेतुमत्ताज्ञानानामनुमितिजनकतासंशयात् उक्तभेदकूटसंदेहेन संदिग्धासिद्धिरित्याशङ्कायां कूटघटकप्रत्येकभेदसाध्यसाधकत्वेन केवलान्वयिन्यभावादित्यनेनोपन्यस्तकेवलान्वयिवृत्तित्वाभावहेतौ स्वरूपासिद्धिर्दुर्वारैव । वस्तुतोऽनुमितिजनकज्ञानविषयस्य केवलान्वयिवृत्तित्वनियमादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाच्यम् । अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारत्वावच्छिन्नं पक्षीकृत्य न केवलान्वयिवृत्तित्वाभावरूपहेतुना साध्याभाववदवृत्तित्वादिभेदस्साध्यते । किन्तु साध्याभाववदवृत्तित्वत्वावच्छिन्नं पक्षीकृत्य तेन हेतुना तादृशप्रकारत्वावच्छिन्नभेद एव । तथा च साध्याभाववदवृत्तित्वत्वादौ तादृशकेवलान्वयिवृत्तित्वाभावरूपहेतोस्सत्वेन न स्वरूपासिद्धिरिति । न चैतादृशानुमानेन साध्याभाववदवृत्तित्वे तादृशप्रकारत्वावच्छिन्नभेदसिद्धावपि तादृशप्रकारत्वरूपप्रथमानुमानपक्षतावच्छेदकावच्छिन्ने साध्याभाववदवृत्तित्वादि भेदादसिद्धया न तदनुमाने संदिग्धासिद्धिशङ्कानिराससंभव इति वाच्यम् । साध्याभाववदवृत्तित्वत्वाद्यवछिन्ने तादृशप्रकारत्वावच्छिन्न भेदसिद्धौ तदुत्तरं तादृश प्रकारत्वावच्छिने साध्याभाववदवृत्तित्वाद्यवच्छिन्ने साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नभेदस्य मानससिद्धिसंभवात् ।

ननु साध्याभाववदवृत्तित्वमिति मूले साध्याभाववदिति मत्वर्थीयोऽसङ्गतः । तत्प्रतिपादितसाध्याभावाश्रयरूपार्थबोधकस्य साध्यस्याभावो यत्रेति बहुव्रीहेस्सत्त्वात् । न च तत्सत्वेऽपि मत्वर्थीयस्य नासाधुत्वमिति वाच्यम् । बहुव्रीहिप्रतिपादितार्थप्रतिपादकस्य कर्मधारयोत्तरमत्वर्थीयस्यासाधुत्वबोधकस्य ''न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्त्वदर्थप्रतिपत्तिकरः इत्यनुशासनस्य विरोधापत्तेः । तादृशानुशासनस्यानित्यत्वमभ्युपगम्यसाध्याभाववानिति मत्वर्थीयस्य साधुत्वोपपादने साध्याभाववतोऽवृत्तमिति षष्ठीतत्पुरुषानन्तरंसाध्याभाववदवृत्तित्वमस्यास्तीति साध्याभाववदवृत्तीति मत्वर्थीयस्यापि साधुत्वसंभवेन एतदनुशासनविरोधमुपदर्श्य ग्रन्थकृतां तत्खण्डनस्यासङ्गतेरिति चेत्, न । मतुपः प्राशस्त्ये विधानात् । साध्याभाववदिति मत्वर्थीयेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपप्राशस्त्याश्रयसाध्याभाववानेव प्रतिपाद्यते । साध्यस्याभावो यत्रेति बहुव्रीहिणा तु साध्याभावाश्रयएवेति मत्वर्थीयार्थबोधकबहुव्रीहेर्मत्वर्थीयासाधुत्वसंपादकस्याभावेन मत्वर्थीयबाधकाभावादिति । न च साध्याभाववदवृत्तीतिमत्वर्थीयेनापि अवश्यविवक्षणीयसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वरूपप्राशस्त्याश्रयतादृशवृत्तित्वाभावाश्रय एव प्रतिपाद्यते । न तु तादृश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तित्वनिष्ठप्रतियोगिताकाभावाश्रयमात्रम्। तथा चैतादृशप्राशस्त्यघटितार्थबोधकत्वं साध्याभाववतो न वृत्तिर्यत्रासौ साध्याभाववदवृत्तिरिति बहुव्रीहौ न संभवत्येवेति तत्खण्डनासङ्गतितादवस्थ्यमिति वाच्यम्। नञ् आद्युपस्थाप्येऽभावेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनैवान्वयितावच्छेदकावच्छिन्नस्यान्वयः। न तु तदाश्रयनिष्ठप्रतियोगिताकत्वसंबन्धेन। तथा सति नीलो घटो न घट इति वाक्यस्यापि प्रामाण्यापत्तेः। तथा च साध्याभाववतो न वृत्तिर्यत्रेति बहुव्रीहौ नञ्सत्वेन तदर्थेऽभावे साध्याभाववत इति षष्ठ्यन्तार्थसाध्याभाववन्निरूपितत्वविशेषितवृत्ति पदार्थवृत्तित्वस्य तादृशवृत्तितात्वावच्छिन्नप्रतियोगिताकत्वेनैवान्वयात्। तादृशवृत्तितात्वावछिन्नप्रतियोगिताकत्वरूपप्राशस्त्यघटितमत्वर्थीयार्थस्यबहुव्रीहिणा प्रतिपादनसंभवे न तत्खण्डनोपपत्तेः। न ह्यभावादिपदसमभिव्याहारस्थलेऽपि अभावपदोपस्थाप्येऽभावेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनैव तदवच्छिन्नस्यान्वय इति नियमः। प्रयोजनाभावात्तथानियमे एकघटवति घटाभाववानिति व्यवहारस्य प्रामाण्यानुपपत्तेः। तथा चावश्यविवक्षणीयसाध्यतावच्छेदकावच्छिन्नस्यप्रतियोगिताकत्वरूपप्राशस्त्यं विना मत्वर्थीयमलाभात्साध्याभाववदिति मत्वर्थीयसङ्गतिरिति ध्येयम्।

साध्याभाववदवृत्तित्वमिति मणिः। अत्र वृत्तित्वं हेतुतावच्छेदकसंबन्धेन बोध्यम्। तेन वह्न्यभाववति धूमावयवे धूमस्य समवायेन वृत्तावपि न क्षतिरिति माथुरी। हेतुतावच्छेदकसंबन्धावच्छिन्नत्वञ्च हेतुतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वे सति हेतुतानिरूपितसंसर्गतानवच्छेदकानवच्छिन्ना या संसर्गता तन्निरूपकत्वम्। अत्र सत्यन्तानुपादाने वह्निसाध्यके पर्वतानुयोगिकसमवायेन सद्धेतौ द्रव्यत्वे वह्न्यभाववद्ध्रदादिनिरूपितहेतुतावच्छेदकसंसर्गतावच्छेदकघटकशुद्धसमवायत्वावच्छिन्नसंसर्गताकवृत्तितामादायाव्याप्तिरतस्तदुपात्तम्। न च तदुपादानेऽपि वह्न्यभाववन्निरूपितनिरुक्तपर्याप्त्यधिकरणपर्वतानुयोगिकत्वसमवायत्वरूपधर्मद्वयावच्छिन्नसंसर्गताकवृत्तित्वाप्रसिद्धिः। तादृशधर्मद्वयावच्छिन्नसंसर्गताकवृत्तितायास्साध्यवन्निरूपितत्वनियमादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाच्यम् । वक्ष्यमाणसत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिवारक-प्रकारस्यात्राप्यनुसंधेयत्वात् । संसर्गतायामनवच्छिन्नत्वानुपादाने वह्निमान् धूमादित्यादौ संयोगेन हेतौ धूमे हेतुतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्य-धिकरणसंयोगत्वघटितसंयोगकालिकान्यतरत्वावच्छिन्नसंसर्गताकनिर्वह्नि वृत्तितामादायाव्याप्तिरतस्तस्याप्युपादानम् । न च अन्यतरत्वेन संसर्गत्वे मानाभावः । संयोगकालिकान्यतरसंबन्धेन धूमवानिति प्रतीतेरेव मान-त्वात् । अत एवोक्तं महादेवभट्टैः समवायसामानाधिकरण्यान्यतरत्वेन प्रतियोगितावच्छेदकसंबन्धत्वं स्वीकृत्य तादृशान्यतरत्वावच्छिन्नसंसर्गताक-सत्तात्वावच्छिन्नप्रतियोगिताकाभावोऽभावत्वमिति । उक्तं च चन्द्रनारायण भट्टैः-विषयत्वसमवायान्यतरत्वेन साध्यतावच्छेदकताघटकसंबन्धत्वम-भ्युपगम्य तादृशान्यतरत्वावच्छिन्नसंबन्धेन रूपत्वादेः साध्यतावच्छेदक-तायामात्मघटान्यतरत्वहेतावव्याप्तिवारणं सिद्धान्तलक्षणप्रविष्टप्रतियोगि-तावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वघटकसाध्य-तावच्छेदकतावच्छेदकसंबन्धतावच्छेदकतापर्याप्तेः प्रयोजनम् ।

अथास्त्वन्यतरत्वेन संसर्गत्वम् । तथापि संयोगकालिकान्यतरसंबन्धेन धूमवानितिप्रतीतिसिद्धाधेयतानिरूपित अन्यतरत्वावच्छिन्नसंसर्गतायां हेतु-तावच्छेदकसंसर्गतावच्छेदकतापर्याप्त्यधिकरणसंयोगत्वावच्छिन्नत्वं न संभ-वति । तत् प्रतीतान्यतरत्वावच्छिन्ने तस्याविशेषणत्वात् । संसर्गविशेषणी-भूत अन्यतरत्वात्मकभेदप्रतियोगितावच्छेदकीभूत भेदप्रतियोगिन्येव तस्य-विशेषणत्वात् संसर्गसाक्षाद्विशेषणीयस्यैव संसर्गतावच्छेदकत्वात् । परम्परया संसर्गविशेषणस्य संसर्गतावच्छेदकतायामेवावच्छेदकत्वात् । तथा च तादृशसंसर्गताकवृत्तितामादाय नोक्तदोष इति चेत् न परंपरया संसर्ग-विशेषणस्य संसर्गतायां संसर्गतावच्छेदकतायां वाऽवच्छेदकत्वमित्यत्र विनिगमनाविरहात् परंपरया संसर्गविशेषणस्यापि संसर्गतावच्छेदकत्वेन निरुक्तप्रतीतौ परंपरयाऽन्यतरविशेषणस्यापि संयोगत्वस्याधेयतानिरूपित-संसर्गतावच्छेदकत्वसंभवेन तादृशाधेयतामादायाव्याप्तिसंभवात् । अत एवोक्तं गदाधरभट्टैः अनुमितिग्रन्थे परामर्शजन्यतायास्साक्षादवच्छेदक-जातिरूपानुमितिलक्षणविचारे "परामर्शकार्यवह्नित्वावच्छिन्नविधेयता-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाल्यनुमितौ परंपरया विशेषणीभवद्वह्नित्वस्य परामर्शजन्यतावच्छेदकत्वमादाय वह्नौ अतिव्याप्तिवारणाय साक्षादिति परंपरया विशेषणव्यावृत्तविलक्षणावच्छेदकतालाभायेति। वस्तुतस्तु अन्यतरत्वेन संसर्गत्वविरहेऽपि परंपरया संसर्गविशेषणस्य संसर्गतावच्छेदकताभावेऽपि न क्षतिः। स्वाश्रयसामानाधिकरण्यसंबन्धेन वह्निमान् संयोगसंबन्धावच्छिन्नाऽऽधेयत्वसंबन्धावच्छिन्न आधेयत्वसंबन्धेन पर्वताश्रयादित्यादौ निरुक्तपर्याप्त्यधिकरणसंयोगसंबन्धावच्छिन्नवृत्तितात्वघटितस्वाभाववन्निरूपितसंयोगावच्छिन्न - वृत्तितात्वावच्छिन्नसंसर्गताकनिर्वह्निशैवालदिनिरूपितवृत्तित्वमादायाव्याप्तिवारकतयैवानवच्छिन्नान्तसार्थक्यात् व्यभिचारस्य संसर्गत्वं इहोपाधिर्नेहोपाधिरिति प्रतीत्या निर्विवादमित्यवधेयम्। "प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वं विशेषणम्। तेन तत्तद्वह्नित्व वह्निजलोभयत्वावच्छिन्नाभावमादाय नाव्याप्ति" रिति माथुरी। अत्र साध्यतावच्छेदकावच्छिन्नत्वञ्च साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकत्वम्। तत्रावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंसर्गावच्छिन्नत्वं देयम्। अन्यथा विषयितया वह्नित्वविशिष्टं संयोगेन नास्तीतिप्रतीतिविषयाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिप्रसङ्गात्। न च तत्संबन्धेन स्वरूपतः भानयोग्यस्यैव तत्संबन्धेन स्वरूपतः प्रतियोगितावच्छेदकत्वम् अन्यथा घटादीनामपि स्वरूपतः प्रतियोगितावच्छेदकत्वापत्तेः तथा च वह्नित्वरूपजातेः समवायमात्रेण स्वरूपतो भानयोग्यायाः वह्नित्वत्वरूपेणैव निरुक्त अभावीयप्रतियोगितायां विषयतया अवच्छेदकत्वस्वीकारावश्यकतया तस्य च साध्यतावच्छेदक केवलवह्नित्वापर्याप्ततया न विषयतया वह्नित्वविशिष्टाभावमादायाव्याप्तिः। निवेशनीया च प्रतियोगितावच्छेदकतायाः पर्याप्तिः महानसीयवह्न्यभावमादाय अव्याप्तिवारणाय इति वाच्यम् वह्नित्वजातेः समवायेन विषयतयापि स्वरूपतः भानावश्यकत्वेन तस्य समवायमात्रेण स्वरूपतः भानयोग्यत्वस्यैवासिद्धेः कथमन्यथा गोत्वत्वाग्रहदशायामपि अयं गौरिति ज्ञानोत्तरं गोत्वेनामुञ्जानामीति विषयतया ज्ञानांशे गोत्वमवगाहमानः प्रत्ययः। जातेर्विषयतया स्वरूपतः भानाङ्गीकारे तत्प्रत्यये गोत्वत्वेनैव विषयितया गोत्वप्रकारक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वस्यैव वाच्यत्वात् । गोत्वत्वविशिष्टवैशिष्ट्यावगाहितापत्त्या तत्प्रयोजकीभूतगोत्वत्वप्रकारकज्ञानस्य पूर्वमभावात् विषयितयापि स्वरूपतो भानाङ्गीकारे च तत्प्रत्ययस्य स्वरूपतो गोत्वप्रकारकत्वेनैव उपपत्तेः । वस्तुतो जातेर्विषयितया स्वरूपतो भानाङ्गीकारेऽपि न क्षतिः वह्नित्वविशिष्टवान् धूमादित्यादौ वह्नित्वत्वेन वह्नित्वसाध्यतावच्छेदकस्थले एव तादृश अभावमादाय अव्याप्तिसंभवात् । तत्र प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणीभूतवह्नित्वत्वविशिष्टस्यैव साध्यतावच्छेदकत्वात् । साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वञ्च साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वे सति तादृशसंसर्गतावच्छेदकेतरानवच्छिन्ना या संसर्गता तन्निरूपकत्वम् । अत्र सत्यन्तानुपादाने विषयत्वसमवायान्यतरसंबन्धेन वह्नित्वविशिष्टस्य संयोगेन साध्यतायां धूमहेतौ स्वाभाववन्निरूपितसंयोगावच्छिन्नाऽधेयतासंबन्धेन वह्निविशिष्टस्य संयोगेन साध्यतायां वा जलरूपसद्धेतौ विषयितासंबन्धेन वह्नित्वविशिष्टन्नास्तीति प्रतीतिविषयाभावंसंयोगावच्छिन्नाधेयतासंबन्धेन वह्निविशिष्टं नास्तीति प्रतीतिविषयाभावञ्चादायातिव्याप्तिरतस्तदुपादानमनवच्छिन्नान्तोपादानेन महानसीयवह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टस्याभावमादाय न वह्निमान् धूमादित्यादावव्याप्तिः । न चैवमपि तादात्म्येन द्रव्यस्य साध्यतायाङ्गगनत्वहेतौ समवायेन द्रव्यत्ववत्कालिकेन द्रव्यत्ववद्भेदमादायाव्याप्तिः तद्भेदप्रतियोगितावच्छेदकतानिरूपितयोः कालिकसमवायनिष्ठसंसर्गतयोः भेदेन तत्र समवायसंसर्गतायाः निरुक्तपर्याप्त्यधिकरणीभूतसमवायत्वावच्छिन्नत्वात् । तादृशसंसर्गतानवच्छेदकानवच्छिन्नत्वाच्चतादृशभेदस्य लक्षणघटकतया गगने हेतोस्सत्त्वादिति वाच्यं साध्यतावच्छेदकतानिरूपितसंसर्गतानवच्छेदकावच्छिन्नसंसर्गत्वानिरूपकत्वे सति तादृशसंसर्गतावच्छेदकता पर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गतानिरूपकत्वस्य साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नपदार्थत्वोपगमेन निरुक्तभेदीयप्रतियोगितावच्छेदकतायां द्रव्यत्वनिष्ठायां निरुक्तसंसर्गतावच्छेदकता पर्याप्त्यधिकरणीभूतसमवायत्वावच्छिन्नसंसर्गतानिरूपकत्वेऽपि तादृशसंसर्गतानवच्छेदकीभूतकालिकत्वावच्छिन्नसंसर्गत्वानिरूपकत्वाभावेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तादृशभेदव्युदासात् । यद्यपि संसर्गताद्वयनिरूपकैकावच्छेदकतायाः प्रमाणासंस्पृष्टत्वेन तद्भेदीयप्रतियोगितानिरूपितयोः कालिकावच्छिन्नावच्छेदकत्वसमवायावच्छिन्नावच्छेदकतयोः भेदात्तत्रसमवायावच्छिन्नावच्छेदकतायां निरुक्तसंसर्गतानवच्छेदकीभूतकालिकत्वावच्छिन्नसंसर्गतानिरूपकत्वमपि शक्यते संभावयितुम् । तथापि साध्यतावच्छेदकतानिरूपितसंसर्गतानवच्छेदकधर्मावच्छिन्नसंसर्गताकावच्छेदकत्वानिरूपकत्वे सति साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकत्वं प्रतियोगितायां साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकताकत्वमित्यनेन विवक्ष्यते । तथा च समवायेन द्रव्यत्ववत् कालिकेन द्रव्यत्ववद्भेदीयप्रतियोगितायाः निरुक्तसंसर्गतानवच्छेदकीभूतकालिकत्वावच्छिन्नसंसर्गताकावच्छेदकताकत्वादेव न तद्भेदमादायोक्तस्थलेऽव्याप्तिः । अथैवमपि कालिकेन महानसानुयोगिकसंयोगविशिष्टसमवायेन वह्नित्वविशिष्टसंयोगेन साध्यतायां धूमादिहेतौ समवायेन महानसानुयोगिकसंयोगविशिष्टकालिकेन वह्नित्वविशिष्टस्य संयोगेनाभावमादायाव्याप्तिः । तदभावप्रतियोगितावच्छेदकतानिरुपितसंसर्गतावच्छेदकयोः समवायत्वकालिकत्वयोः साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकतापर्याप्तमधिकरणत्वात् । न च साध्यतावच्छेदकनिरूपितसंसर्गतावच्छेकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकसाध्यतावच्छेदकनिष्ठावच्छेदकताकेत्यनेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपकत्वं विवक्षितम् । वैशिष्ट्यञ्च स्वसमानाधिकरण्यस्वनिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकत्वोभयसंबन्धेन । स्वपदं साध्यतावच्छेदकतापरम् । तथा च पूर्वोक्तस्थले समवायेन महानसानुयोगिकसंयोगविशिष्टकालिकेन वह्निविशिष्टस्य संयोगेन अभावस्य न लक्षणघटकत्वम् । तदभावीयप्रतियोगितावच्छेदकतयोः स्वसामानाधिकरण्यसाध्यतावच्छेदकतावच्छेदकसंबन्धानवच्छिन्नत्वात् । तथा च न तदभावीयमादायाव्याप्तिः । समवायेन महानसानुयोगिकसंयोगविशिष्टसमवायेन वह्नित्वविशिष्टाभावीयप्रतियोगितानिरूपितमहानसानुयोगिकसंयोगनिष्ठा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वच्छेदकतायां साध्यतावच्छेदकताविशिष्टत्वासंभवेऽपि तदभावीयप्रतियोगित्वीयवह्नित्वनिष्ठसमवायावच्छिन्नावच्छेदकतायां प्रागुक्तोभयसंबन्धेन समवायावच्छिन्नवह्नित्वनिष्ठावच्छेदकतावैशिष्ट्यसत्वात् । तादृशाभावस्यापि लक्षणघटकत्वात् । तद्वति हेतोस्सत्त्वादव्याप्तिरिति तु न देयम् । साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपकत्वस्यैव प्रतियोगितायां निवेशनीयत्वात् । वैशिष्ट्यञ्च प्रागुक्तोभयसंबन्धेन । तथा च समवायेन महानसानुयोगिकसंयोगविशिष्टसमवायेन वह्नित्वविशिष्टाभावीयप्रतियोगितावच्छेदकत्वयोर्मध्ये वह्नित्वनिष्ठावच्छेदकतायास्साध्यतावच्छेदकतावैशिष्ट्येऽपि संयोगनिष्ठावच्छेदकताया अतथात्वेन तन्निरूपकप्रतियोगिताकस्य तदभावस्य लक्षणाघटकत्वात् । इत्थञ्च निरुक्तसत्यन्तं प्रतियोगितायां नोपादेयमेव समवायेन द्रव्यत्ववत्कालिकेनद्रव्यत्ववद्भेदीय प्रतियोगितायास्साध्यतावच्छेदकताविशिष्ट अन्यकालिकसम्बन्धावच्छिन्नावच्छेदकताकत्वादेव तद्भेदमादाय तादात्म्येन द्रव्यसाध्यकगगनत्वहेतुकस्थलेऽव्याप्तिनिरासात् । महानसीय वह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टाभावमादाय अव्याप्तेरपि साध्यतावच्छेदकतावैशिष्ट्यनियामकसंबन्धमध्ये लघुतरस्वनिरूपितसंसर्गताविशिष्टसंसर्गताकत्वस्य द्वितीयसंबन्धत्वेनैव वारणात् । तदनुरोधेन गुरुतरसत्यन्तनिवेशानौचित्यात् । संसर्गतावैशिष्ट्यञ्च संसर्गतायां स्वावच्छेदकतापर्याप्त्यधिकरणधर्मावछिन्नत्वस्वानवच्छेदकतानवच्छिन्नत्वोभयसंबन्धेनेति वाच्यम् । कालिकेन गन्धविशिष्टसमवायेन गुणविशिष्टस्य तादात्म्येन साध्यतायां जन्यद्रव्यत्वहेतौ समवायेन गन्धविशिष्टकालिकेन गुणविशिष्टभेदमादायाव्याप्तेर्दुष्परिहारत्वात् । गन्धविशिष्टतद्भेदीयप्रतियोगितावच्छेदकतायाः गुणनिष्ठसाध्यतावच्छेदकताविशिष्टत्वात् । गुणनिष्ठतत्प्रतियोगितावच्छेदकताया अपि गन्धनिष्ठसाध्यतावच्छेदकताविशिष्टत्वात् । यदि च वैशिष्ट्यनियामकसंबन्धमध्ये सामानाधिकरण्यस्थले व्यापकत्वं निवेश्य गन्धनिष्ठप्रतियोगितावच्छेदकतायाः गुणनिष्ठसाध्यतावच्छेदकताव्यापकत्वाभावेन साध्यतावच्छेदकताविशिष्टान्यतया तद्भेदमादायाव्याप्तिर्न वार्यते तदा विषयितया स्वरूपतो ज्ञानत्वविशिष्टसमवायेन ज्ञानत्वत्वावच्छिन्न विशिष्टस्य तादा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्म्येन साध्यतायां ज्ञानमित्याकारक ज्ञानत्वहेतौ विषयतया ज्ञानत्वत्वावच्छिन्नविशिष्टसमवायेन स्वरूपतो ज्ञानत्ववद्भेदमादायाव्याप्तिरपरिहार्यैव । तद्भेदीयप्रतियोगितावच्छेदकतयोः ज्ञानत्वमात्रनिष्ठयोः स्वव्यापकसाध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वादिति चेत्, सत्यम् ।

तथापि साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपकत्वमित्यत्र साध्यतावच्छेदकतावैशिष्ट्यं न प्रागुक्तोभयसंबन्धेन । किन्तु स्वसजातीयत्वस्वव्यापकत्वस्वनिरूपितसंसर्गताविशिष्टसंसर्गनिरूपकत्वैतत्रितयसंबन्धेन । तथा च विषयितया ज्ञानत्वत्वावच्छिन्नज्ञानभेदीयप्रतियोगितानिरूपितज्ञानत्वनिष्ठविषयितासंबन्धावच्छिन्नअवच्छेदकतायां ज्ञान त्वनिष्ठविषयतासंबन्धावच्छिन्ननिरवच्छिन्नसाध्यतावच्छेदकतायाः द्वितीय तृतीयसंबन्धयोस्सत्त्वेऽपि स्वसजातीयत्वस्वरूपप्रथमसंबन्धाभावेन न निरुक्तत्रितयसंबन्धेन वैशिष्ट्यमिति न तादृशभेदमादाय विषयितया स्वरूपतो ज्ञानत्वविशिष्टसमवायेन ज्ञानत्वत्वावच्छिन्नविशिष्टस्य तादात्म्येन साध्यतायां ज्ञानमित्याकारकज्ञानत्वहेतावव्याप्तिः । साजात्यं सावच्छिन्नत्वनिरवच्छिन्नत्वान्यतररूपेण । तेन न प्रमेयत्वादिना साजात्यमादाय तद्दोषतादवस्थ्यम् । यद्यपि वह्निमतस्तादात्म्येन साध्यतायां धूमादिहेतावव्याप्तिः । अवच्छेद्यभेदेनावच्छेद्यताभेदात् ।

वह्निमद्भेदीयप्रतियोगितावच्छेदकतायां वह्निनिष्ठवह्नित्वावच्छिन्नसाध्यतावच्छेदकतावृत्तिनिरुक्तान्यतरान्तर्गतसावच्छिन्नत्वविरहेण साजात्यघटितत्रितयसंबन्धेन साध्यतावच्छेदकताविशिष्टत्वासंभवात् तादृशभेदस्य लक्षणाघटकत्वात् । तथापि निरुक्तान्यतरान्तर्गतसावच्छिन्नत्वं न तावदवच्छेद्यरूपं येन त्वदुक्तदोषस्स्यात् । परन्तु यावन्ति सावच्छिन्नानि तावदन्यतमत्वरूपं तच्च नावच्छेद्यभेदेन भिन्नमिति साध्यतावच्छेदकतावृत्त्येतादृशान्यतमत्वस्य प्रतियोगितावच्छेदकतायामपि संभवेन नोक्तदोषः । नन्वेवमपि वह्नित्ववद्वान् धूमादित्यादौ वह्नित्वत्वेन वह्नित्वस्य साध्यतावच्छेदकतायां सामानाधिकरण्यसंबन्धेन महानसीयत्ववद्वह्नित्ववान्नास्तीति प्रतीतिविषयाभावमादायाव्याप्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदभावीयप्रतियोगितानिरूपितवह्निनिष्ठवह्नित्वत्वावच्छिन्नावच्छेदकतायाः सावच्छिन्नत्वेन साजात्यस्य व्यापकत्वस्यावच्छेदकसंबन्धावच्छिन्नत्वस्य च सत्त्वेन साध्यतावच्छेदकतावैशिष्ट्यसत्त्वात्। महानसीयत्वनिष्ठसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकतायाः साध्यतावच्छेदकताविशिष्टान्यत्वेऽपि तदनिरूपकत्वस्य प्रतियोगितायामबाधात्। प्रतियोगितावच्छेदकताया एव तन्निरूपकत्वादिति चेत्, न। महानसीयत्वोपलक्षितवह्नित्वावच्छिन्नाभावस्य पर्वतादौ अभावात्। महानसीयत्वविशिष्टवह्नित्वावाच्छिन्नाभावस्य पर्वतादौ सत्त्वेऽपि वह्नित्वनिष्ठतत्प्रतियोगितावच्छेदकतायाः विशिष्टप्रतियोगिकसमवायेनैवावच्छिन्नत्वात्। साध्यतावच्छेदकतावच्छेदकीभूतशुद्ध समवायावच्छिन्नत्वाभावेन उक्तत्रितयसंबन्धेन साध्यतावच्छेदकताविशिष्टत्वाभावात्। तदभावस्य लक्षणाघटकत्वात्। यत्तु विषयितया वह्नित्वत्वावच्छिन्नवतस्तादात्म्येन साध्यतायां तदज्ञानत्वादिहेतावव्याप्तिः। विषयितया जातिमद्भेदीय प्रतियोगितावच्छेदकतायाः जातिसामान्यनिष्ठायाः वह्नित्वावच्छिन्नसाध्यतावच्छेदकतासजातीयत्वेन तद्व्यापकत्वे चोक्तत्रितयसंबन्धेन साध्यावच्छेदकताविशिष्टत्वात्। तादृशाभावस्य लक्षणघटकतया तद्वति जातित्वाविषयकवह्नित्वत्वावच्छिन्नविषयकज्ञाने हेतोस्सत्त्वात्। न च साध्यतावच्छेदकतावैशिष्ट्यनियामकसंबन्धमध्ये स्वव्यापकत्वमपि निवेश्यम्। तथा चोक्तस्थले विषयितया जातिमद्भेदीयप्रतियोगितावच्छेदकतायाः वह्नित्वनिष्ठसाध्यतावच्छेदकताव्यभिचारित्वेन न स्वव्याप्यत्वघटितसंबन्धचतुष्टयेन साध्यतावच्छेदकतावैशिष्ट्यमिति न तादृशाभावमादायाव्याप्तिरिति वाच्यम्। तावतापि विषयितया वह्नित्वत्वप्रकारकप्रमाविशेष्यवद्भेदमादायाव्याप्तेर्दुष्परिहारत्वात् इति तत्तुच्छम्। स्वसजातीयत्वस्वअनवच्छेदकानवच्छिन्नत्वस्वसामानाधिकरण्यस्वावच्छेदक - संबन्धावच्छिन्नत्वएतच्चचतुष्टयसंबन्धेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपकत्वस्य प्रतियोगितायां निवेशनीयत्वात्। विषयितया वह्नित्वत्वावच्छिन्नविशिष्टसाध्यकस्थले जातित्ववह्नित्वत्वप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नावच्छेदकतायां साध्यतावच्छेदकतानवच्छेदकीभूत-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तादृशधर्मावच्छिन्नत्वसत्त्वेन साध्यतावच्छेदकतावैशिष्ट्यमिति तादृशावच्छेदकताकप्रतियोगिताकाभावमादाय दोषाभावात्। कालिकेन गन्धविशिष्टसमवायेन गुणविशिष्टसाध्यकस्थले समवायेन गन्धविशिष्टकालिकेन गुणविशिष्टभेदीयप्रतियोगितानिरूपितगन्धनिष्ठावच्छेदकतायाः गन्धनिष्ठसाध्यतावच्छेदकतावच्छेदककालिकावच्छिन्नत्वाभावेन गुणनिष्ठसाध्यतावच्छेदकतानवच्छेदकगन्धत्वानच्छिन्नत्वाभावेन च साध्यतावच्छेदकताविशिष्टान्यतया तद्भेदमादायाव्याप्त्यसंभवात्। तद्वारकं व्यापकत्वं वैशिष्ट्यशरीरे न निवेशनीयमेव। परन्तु वह्निमान् धूमादित्यादि निरवच्छिन्नसाध्यतावच्छेदकवत्स्थले साध्यतावच्छेदकतावच्छेदकाप्रसिद्ध्या स्वानवच्छेदकानवच्छिन्नत्वघटितचतुष्टयसंबन्धेन साध्यतावच्छेदकताविशिष्टस्याप्रसिद्धेरव्याप्तिः परमवशिष्यते। सापि स्वानवच्छेदकानवच्छिन्नमित्यनेनावच्छेदकतासंबन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववद्धर्मानवच्छिन्नत्वविवक्षया वारणीया। अथ वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकतयाऽवच्छेदकतासंबन्धस्यापि वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धिः। न च वृत्त्यनियामकसंबन्धावच्छिन्नप्रतियोगिताकाभावाङ्गीकारे किं बाधकमिति वाच्यम्। वृत्त्यनियामकसंबन्धावच्छिन्नाभावस्याधिकस्य स्वीकारे गौरवस्यैव बाधकत्वात्। न च धनस्वामित्वत्वावच्छिन्नाश्रयतासंबन्धावच्छिन्नाभाव एव स्वामित्वसंबन्धावच्छिन्नधनत्वावच्छिन्नाभावत्वकल्पनान्नाभावाधिक्यमिति वाच्यम्। स्वामित्वसंबन्धावच्छिन्नप्रतियोगितायाः आधिक्येन गौरवस्य दुर्वारत्वात्। न च स्वामित्वनिष्ठप्रतियोगितायामेव स्वामित्वसंबन्धावच्छिन्नधनत्वावच्छिन्नप्रतियोगितात्वं शक्यते कल्पयितुम्। धनत्वस्य स्वामित्वावृत्तित्वात्। वक्ष्यति च मणिकारः प्रतियोग्यवृत्तिश्चेत्यादिना व्यधिकरणस्य प्रतियोगितानवच्छेदकत्वमिति चेत्, न। स्वानवच्छेदकानवच्छिन्नत्वमित्यनेन स्वनिष्ठनिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपकतावच्छेदकत्वनिष्ठप्रकारतानिरूपितावच्छेदकनिष्ठप्रकारतानिरूपितभेद-निष्ठप्रकारतानिरूपितधर्मनिष्ठप्रकारतानिरूपितावच्छिन्नत्वनिष्ठप्रकारता-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निरूपितविशेष्यतायाः प्रमीयविशेष्यताप्रतियोगिकस्वरूपसंबन्धावच्छिन्नाभावत्वविवक्षणेन वह्नित्वनिष्ठनिरवच्छिन्नसाध्यतावच्छेदकतायाः अनवच्छेदकानवच्छिन्नत्वस्याप्रसिद्धावपि स्वावच्छेदकधर्मभिन्नधर्मावच्छिन्नत्ववदित्याकारकभ्रमे प्रसिद्धस्वनिष्ठप्रकारकेत्यादिक्रमेणावच्छिन्नत्वप्रकारतानिरूपितविशेष्यत्वस्य प्रभाविशेष्यत्वप्रतियोगिकस्वरूपसंबन्धात्मकव्यधिकरणसंबन्धावच्छिन्नाभावात्मक संबन्धस्य वह्न्यभावीयप्रतियोगितावच्छेदकतायां सत्वेन दोषाभावात् । कालिकेन गन्धविशिष्टसमवायेन गुणविशिष्टस्य तादात्म्येन साध्यतायां समवायेन गन्धविशिष्टेत्यादि भेदीयप्रतियोगितानिरूपितगन्धत्वावच्छिन्नावच्छेदकतायां गुणविशिष्टसाध्यतावच्छेदकतानवच्छेदकीभूतगन्धत्वावच्छिन्नत्ववदित्याकारकप्रमीयगुणनिष्ठसाध्यतावच्छेदकतानिष्ठप्रकारतायाः परंपरया निरूपितविशेष्यतायाः प्रभाविशेष्यताप्रतियोगिकस्वरूपसंबन्धेन सत्त्वात् । तत्संबन्धावच्छिन्नाभावघटितचतुष्टयसंबन्धेन गुणनिष्ठतादृशावच्छेदकताया असत्त्वेन गन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वविरहेण च साध्यतावच्छेदकताविशिष्टान्यत्वसत्त्वान्न तद्भेदमादाय दोषः । तथा च साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपकसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभावो व्याप्तिः । वैशिष्ट्यञ्च स्वसजातीयत्वस्वनिष्ठप्रकारतानिरूपितावच्छेदकत्वनिष्ठप्रकारतानिरूपितावच्छेदकनिष्ठप्रकारतानिरूपितभेदनिष्ठप्रकारतानिरूपितधर्मनिष्ठप्रकारतानिरूपितावच्छिन्नत्वनिष्ठप्रकारतानिरूपितविशेष्यतानिष्ठप्रभीयविशेष्यत्वप्रतियोगिकस्वरूपसंबन्धावच्छिन्नप्रतियोगिकाभाववत्त्वस्वनिरूपितसंसर्गताविशिष्टसंसर्गतानिरूपकत्वस्वसमानाधिकरणत्वैतच्चतुष्टयसंबन्धेन । स्वपदं साध्यतावच्छेदकतापरम् । तृतीयसंबन्धघटकवैशिष्ट्यञ्च । स्वावच्छेदकता पर्याप्त्यधिकरण धर्मावच्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन । अत्र स्वपदं साध्यतावच्छेदकतानिरूपितसंसर्गतापरमिति ध्येयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शतकोटिप्रारम्भः

प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वं विशेषणम् । तेन तत्तद्वह्नित्वावच्छिन्नाभावमादाय नाव्याप्तिरित्यर्थकमाधुरी ।

(१) ननु संभवति च लघुधर्मे गुरौ तदभावादित्यनेनातिप्रसङ्गाद्यनापादकलघुसमानाधिकरणगुरोरनवच्छेदकत्वस्य दीधितिकारैरभिधानात् तादृशवह्नित्वसमानाधिकरणप्रमेयवह्नित्वावच्छिन्नसाध्यके प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः । साध्यतावच्छेदकप्रमेयवह्नित्वावच्छिन्नप्रतियोगित्वाप्रसिद्धेः ।

(२) न च साध्यतावच्छेदकप्रमेयवह्नित्वावच्छिन्नप्रतियोगितायाः अप्रसिद्धावपि तद्घटकवह्नित्वावच्छिन्नप्रतियोगितायाः प्रसिद्ध्या तामादायैव लक्षणसङ्गतिः ।

(३) न च महानसीयवह्निमान् धूमादित्यादौ साध्यतावच्छेदकघटकवह्नित्वावच्छिन्नप्रतियोगिताकवह्निसामान्याभाववद्वृत्तित्वाभावमादायातिव्याप्तिः । अतस्साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः विवक्षणीयतया प्रमेयवह्नित्वरूपतादृशधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारैवेति वाच्यम् ।

(४) साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैव धूमाभाववद्व्यक्तिविशेषवृत्तित्वाभावमादाय धूमसाध्यकवह्नावतिव्याप्तिवारणाय विवक्षणीयतया साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकमहानसीयवह्न्यभाववति वर्तमाने धूमे तादृशसामान्याभावविरहादतिव्याप्तिव्युदासात् न्यूनवारकपर्याप्तेरनावश्यकत्वेन गुरुधर्मावच्छिन्नसाध्यकेऽव्याप्तिविरहादिति ।

(५) न च साध्याभाववद्यत्किञ्चिद्व्यक्तिवृत्तित्वाभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नप्रतियोगि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ताकत्वोपलक्षितयत्किञ्चिदभाववत्वृत्तित्वावच्छिन्नप्रतियोगिताकाभाव एव निवेश्यते तथा च महानसीयवह्नित्वावच्छिन्नसाध्यके साध्यतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकवह्निसामान्याभावव्यक्तिमद्वृत्तित्वाभावमादायातिव्याप्तिवारणायै -कदेशावच्छिन्नाभावव्यावृत्तसाध्यतावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नप्रतियोगिताकत्वस्यैवाभावोपलक्षणतायाः आवश्यकतया प्रमेयवह्निसाध्यकेऽव्याप्तिर्दुर्वारैवेति वाच्यम् ।

(६) रूपसामान्याभाववाननुष्णाशीतस्पर्शादित्यादौ साध्याभावव्यक्तिविशेषात्मकजलरूपवद्वृत्तित्वाभावमादायातिव्याप्तिभिया प्रतियोगिताकत्वान्तस्यापि विशेषणत्वध्रौव्येण वह्निसामान्याभावव्यक्तिमद्वृत्तित्वाभावमादायातिव्याप्तेरुक्तस्थलेऽसत्त्वेन - न्यूनवारकपर्याप्तेरनावश्यकत्वात् ।

(७) वस्तुतस्तु अभावांशे उपलक्षणतया साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वघटितलक्षणे प्रमेयवह्नित्वावच्छिन्नस्थलेऽव्याप्तिभियैव तन्नाद्रियते, किन्त्वभावांशे विशेषणतया पर्याप्तघटितसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वघटितमेवेति नाव्याप्तिगन्धोऽपि । एतेन अभावांशे प्रतियोगिताकत्वपर्यन्तं नोपलक्षणम् । किन्तु प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमेव तथा च साध्यतावच्छेदकावच्छिन्नत्वोपलक्षितयत्किञ्चित्प्रतियोगिकाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाव एव व्याप्तिः ।

(८) तथा चाभावांशे प्रतियोगित्वाघटितधर्मावच्छिन्नाभावस्य लक्षणाघटकतया तादृशजलरूपवद्वृत्तित्वाभावमादाय न रूपसामान्याभावसाध्यकेऽतिव्याप्तिः । तथा च वह्नित्वावच्छिन्ना या वह्निसामान्याभावीया प्रतियोगिता तन्निरूपकाभाववद्वृत्तित्वाभावमादाय महानसीयवह्निमान् धूमादित्यादावतिव्याप्तिवारणाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्यूनवारकपर्याप्तिरावश्यकीति परास्तम्। उपलक्षणघटितलक्षण-स्याव्याप्तिभिया अनादरणादिति वाच्यम्।

(९) वह्निघटान्यतरवान् धूमादित्यादौ साध्यतावच्छेदकघटकघटत्वा-वच्छिन्नाभावमादाय अव्याप्तेर्वारणाय न्यूनवारकपर्याप्तेरावश्य-कत्वेन प्रमेयवह्निसाध्यकधूमहेतुकस्थलेऽव्याप्तेरावश्यकत्वात्।

(१०) यत्तु साध्यतानिरूपितसाक्षादवच्छेदकताश्रयधर्मावच्छिन्नत्वं निवेश्यान्यतरत्वघटकभेदप्रतियोग्यंशे विशेषणतया परंपरया साध्यतावच्छेदकघटत्वावच्छिन्नाभाववारणेन न्यूनवारकपर्याप्ते-र्नैष्फल्यमितिवदन्ति तत्तुच्छम्।

(११) तत्राव्याप्तिवारणेऽपि विषयितया वह्नित्वत्वावच्छिन्नविशिष्ट-स्य तादात्म्येन साध्यतायां तद्ज्ञात्वरूपहेतौ साध्यतायां साक्षा-दवच्छेदकवह्नित्वनिष्ठनिरवच्छितनप्रतियोगितावच्छेदकताकस्व-रूपतो विषयितया वह्नित्ववद्भेदमादायाव्याप्तिवारणाय न्यून-वारकपर्याप्तेरावश्यकत्वात्।

(१२) अथ विषयितया स्वरूपतो वह्नित्वविशिष्टस्य तादात्म्येन साध्यतायां तद्ज्ञानत्वहेतौ साध्यतावच्छेदकतापर्याप्त्यधिकरण-वह्नित्वघटितवह्नित्वत्वविशिष्टावछिन्नभेदमादायाव्याप्तिवार-णाय साध्यतावच्छेदकताविशिष्टावच्छेदकताकप्रतियोगिता-कत्वं विवक्षणीयम्। वैशिष्टयञ्च स्वसजातीयत्वस्वसमानाधि-करणत्वस्वावच्छेदकसंबन्धावच्छिन्नत्वैतत्त्रितयसंबन्धेन। तथा च स्वरूपतो वह्नित्वस्य साध्यतावच्छेदकस्थले वह्नित्वत्वावच्छि-न्नावच्छेदकताया इव वह्नित्वत्वेन वह्नित्वस्य साध्यतावच्छेद-कतायां वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतायाः साध्यता-वच्छेदकता साजात्यविरहेण तादृशावच्छेदकताकप्रतियोगिताका-भावमादायाव्याप्ति विरहाद्व्यर्था न्यूनवारकपर्याप्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१३) यदि च विषयितया वह्नित्वत्वेन वह्नित्वस्य साध्यतावच्छेदकतायां स्वरूपतो वह्नित्वावच्छिन्नभेदमादाय दोषासंभवेऽपि विषयितया जातित्वविशिष्टावच्छिन्नभेदमादायाव्याप्तिर्दुवारा । जातित्वावच्छिन्नतद्भेदप्रतियोगितावच्छेदकतायां वह्नित्वत्वावच्छिन्नसाध्यतावच्छेदकतासाजात्यघटितसंबन्धत्रयस्य सत्त्वादिति न्यूनवारकपर्याप्तिरावश्यकीति मन्यते ।

(१४) तथापि तत्रैव विषयितया वह्नित्वत्वावच्छिन्नविशिष्टविषयितया जातित्वावच्छिन्नविशिष्टभेदस्य साध्यतावच्छेदकताविशिष्टसाध्यतावच्छेदकतापर्याप्त्यधिकरणीभूतवह्नित्वत्वविशिष्ट - निष्ठावच्छेदकताकप्रतियोगिताकस्य हेतुमति सत्त्वादव्याप्तिभिया स्वसजातीयत्वघटितपूर्वोक्तसंबन्धत्रयेण साध्यतावच्छेदकताविशिष्टावच्छेकताकत्वं विहाय स्वसजातीयत्वस्वानवच्छेदकानवच्छिन्नत्वस्वावच्छेदकसंबन्धावच्छिन्नत्वस्वसामानाधिकरण्यैतच्चतुष्टयसंबन्धेनसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्व - निरूपकत्वस्य निवेशनोयतया साध्यतावच्छेदकतानवच्छेदकीभूतजातित्वावच्छिन्नावच्छेदकताकजातिमद्भेदवारणात्तदनु - रोधेन न्यूनवारकपर्याप्तेरनावश्यकत्वात् । तथा च प्रमेयवह्निमान् धूमादित्यादौ निरुक्तचतुष्टयसंबन्धेन वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदक - तामात्रनिरूपकप्रतियोगिताकाभावमादाय लक्षणसङ्गतिरिति चेत्, न ।

(१५) विषयितया वह्नित्वत्वेन वह्नित्वस्य साध्यतावच्छेदकतायां विषयितया वह्नित्ववद्भेदमादायाव्याप्तेस्साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्ना - नुयोगिताकपर्याप्तीयावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपितनिरूप्यत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्वरूपस्य न्यूनवारकपर्याप्तिघटितसाध्यतावच्छेदकावच्छिन्नत्वस्य निवेशनैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वारणसंभवात् । तदनुरोधेन प्रागुक्तगुरुतरविशेषणस्यानावश्यकत्वात् । तथा च प्रमेयवह्निमान् धूमादित्यादौ अव्याप्तिर्दुर्वारैवेति चेत्, न ।

(१६) विषयितया स्वरूपतो ज्ञानत्वविशिष्टसमवायेन ज्ञानत्वत्वावच्छिन्नविशिष्टस्य तादात्म्येन साध्यतायां तद्ज्ञानत्वहेतौ विषयितया ज्ञानत्वत्वावच्छिन्नविशिष्टसमवायेन स्वरूपतो ज्ञानत्वविशिष्टभेदस्य स्वप्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकीभूतज्ञानत्वावच्छिन्नसाधारण - समुदायत्वात्मकसाध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक - पर्याप्त्यनुयोगितावच्छेदकस्य निरुक्त न्यूनेतरवारकपर्याप्तिघटितसाध्यतावच्छेदकावच्छिन्नत्वनिवेशेऽप्यवारणात् । प्रागुक्तचतुष्टय संबन्धेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपकत्वस्यावश्य न्निवेशनीयत्वात् । वस्तुतस्तु निरुक्तावच्छेदकत्वानिरूपकत्वस्य पर्याप्तिद्वयघटितसाध्यतावच्छेदकावच्छिन्नत्वापेक्षया गुरुत्वेऽपि प्रमेयवह्निमान् धूमादित्यादिस्थलसंग्रहतया तस्यैव-लक्षणघटकत्वम् । न तु लघुनोऽपि पर्याप्तिद्वयघटितसाध्यतावच्छेदकावच्छिन्नत्वस्य तदसंग्राहकत्वात् ।

(१७) अथ विषयितया महानसीयवह्निसाध्यकतद्ज्ञानत्वहेतौ शुद्धवह्नित्वावच्छिन्नविषयितासंबन्धावच्छिन्नत्वस्यापि साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वनिरूपकप्रतियोगिताकतया तद्वति हेतोस्सत्त्वादव्याप्तिभिया न्यूनवारकपर्याप्तिघटितसाध्यतावच्छेदकावच्छिन्नत्वमपि प्रतियोगितायां देयम् । एवं च प्रमेयवह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारैव ।

(१८) वस्तुतस्तु न्यूनवारकपर्याप्त्यनिवेशे प्रमेयवह्निमान् धूमादित्यादावव्याप्त्यभावेऽपि स्वाघटकलघुधर्मसमनियतगुरुधर्मावच्छिन्न-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साध्यके कम्बुग्रीवादिमद्वान् घटादित्यादौ कम्बुग्रीवादिमत्वसमनियतघटत्वस्य कम्बुग्रीवादिमदभावप्रतियोगितावच्छेदकतया साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वाप्रसिद्धेः ।

(१९) एतेनैतल्लक्षणकृन्नये विषयितासंबन्धेन व्याप्यव्यापकभावो नाङ्गीकर्तव्यः । अन्यथा विषयितया वह्नेस्साध्यतायां तद्ज्ञानत्वहेतावव्याप्तेः । विषयितया वह्न्यभावस्स्वरूपेण नास्तीति प्रतीतेस्ताहशाभावत्वेन विषयितया वह्निविषयकत्वे तद्ज्ञानविषयितानवच्छेदकधर्मावच्छिन्नस्य तद्ज्ञाने विषयितासंबन्धेनावृत्त्या वह्न्यभावाभावत्वावच्छिन्नविषयके वह्निरिति ज्ञाने तादृशप्रतीत्यनुपपत्त्या अतिरिक्ताभावस्यैव स्वरूपेण तादृशप्रतीतिनियामकत्वात् विवक्षणीयसाध्याभाववृत्तिसाध्यसामान्यनिरूपितप्रतियोगित्वादेरप्रसिद्धत्वात् । तथा च विषयितया महानसीयवह्निसाध्यकस्थले उपदर्शितन्यूनवारकपर्याप्तिव्यावृत्त्यसंगतिरिति परास्तमिति चेत्, सत्यम् ।

(२०) तथापि साध्यतावच्छेदकावच्छिन्नत्वं न स्वरूपसंबन्धरूपम् । किन्तु व्यापकत्वमेव । तथा च वह्न्यभावीयप्रतियोगितायाः प्रमेयवह्नित्वानवच्छिन्नत्वेऽपि तद्व्यापकत्वानपायात् न प्रमेयवह्निमान्धूमादित्यादावव्याप्तिः ।

(२१) ननु प्रतियोगितायास्स्वरूपसंबन्धात्मिकायाः प्रतिव्यक्तिभिन्नतया न वह्नित्वादिसाध्यतावच्छेदकव्यापकत्वमिति नानाव्यक्तिवह्न्यादिसाध्यकेऽव्याप्तिः ।

(२२) न च प्रतियोगितात्वादिना व्यापकत्वमस्तीति शङ्क्यम् ।

(२३) प्रतियोगितात्वप्रमेयत्वादिना घटाद्यभावप्रतियोगितायाः अपि वह्नित्वव्यापकतया असंभवभिया साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्यैव प्रतियोगितायाः निवेशनीयतया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्य चालनीन्यायेन साध्यवृत्तिभेदप्रतियोगितावच्छेदकप्रतियोगितायामसंभवात् ।

(२४) न च व्यापकत्वं प्रतियोगितायां न स्वरूपसंबन्धेन किन्तु स्वनिरूपकाभावनिरूपितप्रतियोगित्वसंबन्धेन । तथा च वह्निसामान्याभावीयतद्वह्निनिष्ठप्रतियोगित्वस्य स्वरूपेण तद्वह्निविश्रान्तत्वेऽपि अनेन संबन्धेन वह्निसामान्यनिष्ठतया न व्यापकत्वभङ्ग इति शङ्क्यम् ।

(२५) तथा सति समनियताभावानामैक्येन संयोगेन घटाभावस्य घटीयसंयोगेन प्रमेयाभावस्य चाभेदात् । घटनिष्ठप्रतियोगिताया अपि स्वनिरूपकाभावीयप्रमेयत्वावच्छिन्नप्रतियोगितासंबन्धेन केवलान्वयिन्याः वह्नित्वव्यापकतया घटाभावमादायाव्याप्तिरिति चेत्, न ।

(२६) निरुक्तव्यापकताघटकसंबन्धेनप्रतियोगितायां साध्यतानिरूपितसंसर्गतानवच्छेदकानवच्छिन्नसंसर्गताकत्वविवक्षया दोषाभावात् । घटाभावीयप्रमेयनिष्ठप्रतियोगितायाः तादृशसंसर्गतानवच्छेदकघटप्रतियोगिताकत्वावच्छिन्नसंसर्गताकत्वात्तद्घटित - रुक्तपरम्परासंबन्धेन घटाभावीयप्रतियोगितायाः व्यापकत्वायोगात् ।

(२७) यदि चैतादृशपरम्परायास्संसर्गत्वं नेष्यते ।

(२८) तदा साध्यतावच्छेदकवन्निष्ठस्वनिरूपकाभाववन्निरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिता नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगित्वनिष्ठप्रतियोगितानिरूपितनिरूपितत्वनिष्ठा - वच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितनिरूपकत्व - निष्ठावच्छेदकतानिरूपितावच्छेदकताशून्यत्वमेव प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वम् । तथा च घटाभावीयप्रतियोगितानिरूपकाभावनिरूपितशुद्धसंयोगसंबन्धावच्छिन्नप्रतियोगित्वा -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावस्य वह्नौ सत्वान्न घटाभावस्य लक्षणघटकत्वम् । वह्न्य भावीयप्रतियोगितानिरूपकाभावनिरूपितप्रतियोगित्वाभावस्य वह्न्यभावेन वह्न्यभावस्य लक्षणघटकत्वमपि निर्वहतीति बोध्यम् ।

(२९) न च संयोगेन घटाभावस्य संयोगेन घटघटान्यप्रमेयोभयाभावाभिन्नतया तादृशोभयत्वावच्छिन्नप्रतियोगितायाः घटनिष्ठप्रतियोगितानिरूपकाभावनिरूपिततया शुद्धसंयोगसंबन्धावच्छिन्नतया च तस्याः केवलान्वयितया साध्यतावच्छेदकवन्निष्ठनिरुक्ताभावाप्रसिद्धिरिति वाच्यम् ।

(३०) साध्यतावच्छेदकवन्निष्ठः यो यत्किञ्चित्प्रतियोगितावच्छेदकतावद्धर्मपर्याप्तावच्छेदकताकयत्किञ्चित्प्रतियोगितानिरूपकाभावनिरूपितप्रतियोगिता नास्तीति प्रतीतिसिद्धाभावः तन्निरूपिता या प्रतियोगितानिष्ठाऽवच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपित धर्मनिष्ठावच्छेदकतानिरूपितपर्याप्तिनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपिका या प्रतियोगितानिष्ठप्रतियोगिता तन्निरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकताशून्यत्वस्यैव प्रतियोगितायां निवेशनीयत्वात् । पटत्वावच्छिन्नप्रतियोगितानिरूपकाभावीयप्रतियोगितासामान्याभावस्याप्रसिद्धावपि तदवच्छेदकावच्छिन्नतन्निरूपकाभावनिरूपितप्रतियोगितासामान्याभावस्य वह्न्यादौ सत्त्वेनासंभवाभावात् ।

(३१) न च साध्यतावच्छेदकवन्निष्ठयत्किञ्चित्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगिता नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगित्वनिष्ठप्रतियोगितानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिरूपितादवच्छेदकताशून्यत्व निवे-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शेनापि सामञ्जस्याद्वयर्थं गुरुतराभावघटितकल्पनानुसरणमिति वाच्यम् ।

(३२) घटत्वावच्छिन्नप्रतियोगितावच्छेदकघटत्वनिष्ठकालिकसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगितायाः वह्नौ सत्त्वेन तदवच्छेदकावच्छिन्नप्रतियोगितासामान्यस्याभावात् साध्यनिष्ठतादृशाभावाप्रसिद्धया जन्यमात्रसाध्यकाव्याप्तिवारणायैव तदनुसरणात् ।

(३३) नन्वेवमपि वह्निघटोभयाभावीयप्रतियोगितायाः वह्नित्वव्यापकतया तद्वति हेतोस्सत्त्वात् वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यम् ।

(३४) न च प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वमपि निवेशनीयम् । तेन तद्वारणं अत्र व्याप्यत्वं स्वावच्छेदकावच्छिन्नस्वनिरूपकाभावनिरूपितप्रतियोगिताकत्वसंबन्धेन । तेन प्रतियोगितायास्स्वरूपसंबन्धात्मकत्वे वह्निघटोभयाभावीयवह्निनिष्ठप्रतियोगितायाः स्वरूपसंबन्धेन साध्यतावच्छेदकव्याप्यत्वेऽपि न क्षतिरिति वाच्यम् ।

(३५) तावतापि तार्णातार्णोभयाभावमादायाव्याप्तेरवारणात् । तत्प्रतियोगिताया वह्निभिन्नेऽसत्त्वादिति चेन्न ।

(३६) प्रतियोगितायां साध्यतावच्छेदकसमनैयत्यमनिवेश्य साध्यतावच्छेदकव्यापकधर्मावच्छिन्नत्वस्य निवेशनीयत्वात् । वह्निघटोभयत्वादेर्व्यासज्यवृत्तितया वह्नौ तदवच्छिन्नभेदसत्त्वात् वह्नित्वव्यापकत्वासंभवेन तदवच्छिन्नाभावमादाय दोषाभावात् ।

(३७) न चात्र साध्यतावच्छेदकव्यापकत्वं साध्यतावच्छेदकतावच्छेदकसंबन्धेन वाच्यम् । अन्यथा वह्नित्वादेरपि वह्न्यादिनिष्ठभेदीयप्रतियोगितायां विषयितासंबन्धेनावच्छेदकतया व्यापकत्वस्यै-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाप्रसिद्धिप्रसङ्गात् तथा च वह्निघटोभयत्वादेः साध्यतावच्छेदकतावच्छेदक समवायेनाव्यासज्यवृत्तितया तेन संबन्धेन व्यापकत्वात् तदवच्छिन्नाभाववारणमशक्यमेवेति वाच्यम् ।

(३८) समवायेन वह्नित्वव्यापकवह्नित्वादिनिष्ठविषयितासंबन्धावच्छिन्नअवच्छेदकताकप्रतियोगिताकाभाववति वर्तमाने धूमादावसंभववारणाय व्यापकधर्मनिष्ठावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशनीयतया वह्निघटोभयाभावमादाय दोषासंभवात् तत्प्रतियोगितावच्छेदकतायाः पर्याप्ति संबन्धावच्छिन्नत्वात् ।

(३९) वस्तुतस्तु प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन साध्यतावच्छेदकव्यापकत्वं वाच्यम् । न तु साध्यतावच्छेदकतावच्छेदकसंबन्धेन । तथा सति वह्नित्वप्रतियोगिकसमवायेन वह्नित्वस्य साध्यतावच्छेदकतायां धूमादिहेतावव्याप्तिः । साध्यतावच्छेदकाधिकरणे वर्तमानवह्नित्वप्रतियोगिकसमवायसंबन्धावच्छिन्नावच्छेदकताकभेदाप्रसिद्धेः । प्रतियोगितावच्छेदकतावच्छेदकसंबन्धेन व्यापकत्वाभिधाने तु शुद्धसमवायावच्छिन्नवह्नित्वावच्छिन्नाभावमादायैव लक्षणसमन्वयः । तथा च वह्निघटोभयत्वस्य वह्निघटोभयाभावप्रतियोगितावच्छेदकताघटकपर्याप्तिसंबन्धेन साध्यतावच्छेदकव्यापकत्वमेव नास्तीति ध्येयम् ।

(४०) न च व्यापकत्वं न भेदगर्भं किन्त्वत्यन्ताभावघटितमेव । तथा च वह्नित्वप्रतियोगिकसमवायेव वह्नित्वस्य साध्यतावच्छेदकतायां तेन संबन्धेन घटत्वाद्यभावमादाय लक्षणसमन्वयः । व्यधिकरणसंबन्धावच्छिन्नाभावस्य सर्वसिद्धत्वादिति वाच्यम् ।

(४१) जगन्मात्रस्यैव साध्यनिष्ठविशिष्टाभावोभयाभावप्रतियोगितया-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्यन्ताभावगर्भव्यापकत्वस्याप्रसिद्धेः भेदगर्भव्यापकत्वस्यैवानुसरणीयत्वात् ।

(४२) अथ वह्नित्वादेः तत्तद्वह्निवृत्तित्वविशिष्टवह्नित्वाद्यवच्छिन्नभेदप्रतियोगितावच्छेदकतया गुरुधर्मादेरेव साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वप्रसिद्ध्या तदवच्छिन्नप्रतियोगित्वाप्रसिद्धितादवस्थ्यमिति चेत्, न ।

(४३) साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितावच्छेदकतापर्याप्त्यनवच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकप्रतियोगिकाभावस्यैव साध्याभावपदेन विवक्षणीयतया तादृशभेदप्रतियोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नपर्याप्तावच्छेदकताकप्रतियोगिताकवह्निर्नास्तीत्यभावमादायैव समन्वयात् । साध्यतावच्छेदकवन्निष्ठात्यन्ताभावीयसाध्यतावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकतापर्याप्त्यनवच्छेदकैकत्ववदुभयावृत्तिधर्मवत्वरूपमत्यन्ताभावगर्भव्यापकत्वं निरुच्य तदाश्रयधर्मावच्छिन्नाभावो निवेशयितुं शक्यत एव । वह्नित्वगततद्व्यक्तित्वावच्छिन्नाभावस्य वह्नावभावेन तादृशाभावप्रतियोगितावच्छेदकतापर्याप्त्यनवच्छेदकैकत्ववत्तद्व्यक्तित्वरूपवह्नित्वव्यापकत्वस्य वह्नित्वे निर्बाधत्वात् धर्मे उभयावृत्तित्वनिवेशाच्च न प्रमेयत्वादिना घटत्वादेरपि व्यापकत्वमादायासंभवः ।

(४४) न च नानाव्यक्तिसाध्यतावच्छेदकस्थले गुणवान् द्रव्यत्वादित्यादौ तादात्म्येन गुणवतस्साध्यतायामव्याप्तिः । सर्वस्यापि गुणस्य साध्यनिष्ठतत्तद्व्यक्तित्वावच्छिन्नाभावप्रतियोगित्वात् निरुक्तव्यापकत्वासंभवादिति वाच्यम् ।

(४५) अखण्डद्रव्यत्वादेरेवोक्तव्यापकत्वसंभवेन तदवच्छिन्नभेदमादाय लक्षणसमन्वयादिति चेत्, न ।

(४६) अत्यन्ताभावगर्भव्यापकत्वस्य निर्वक्तुं शक्यत्वेऽपि तस्यापि प्रति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगितावच्छेदकताघटकसंबन्धेन वक्तव्यत्वात् । अन्यथा संयोगस्य संयोगप्रतियोगिकसमवायेन साध्यतावच्छेदकतायां सद्धेतौ वह्नि-धूमोभयवान् धूमादित्यादौ च संयोगातिरिक्तस्य संयोगप्रति-योगिकसमवायरूपव्यधिकरणसंबन्धावच्छिन्नतादृशाभावप्रतियो-गित्वात् । संयोगस्याप्यव्याप्यवृत्तित्वेन तेन संबन्धेन तादृशा-भावप्रतियोगित्वात् वह्नि धूमोभयत्वादेः व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकताघटकपर्याप्त्या अव्याप्यवृत्तितया तदति-रिक्तस्य तेन संबन्धेनावृत्त्या च जगन्मात्रस्यैतत्संबन्धावच्छिन्न-तादृशाभावप्रतियोगित्वात् व्यापकत्वस्यैव दुर्लभत्वापत्तेः ।

(४७) नन्वेवमपि समवायेन वह्निधूमोभयत्वस्य वह्नित्वव्यापकतया तत्संबन्धावच्छिन्नतन्निष्ठावच्छेदकताकप्रतियोगिताकाभावमा-दाय बह्निसाध्यकाव्याप्तिर्दुवारैवेति चेत् न ।

(४८) तादृशाभावस्य वह्निघटोभयत्वविशिष्टस्य वह्नेरधिकरणेऽसत्वे-नादोषात् । स्वीकारे व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियो-गिताविशेषणत्वेन तादृशाभावो वारणीयः । इत्थञ्च प्रतियोगि-तायां साध्यतावच्छेदकव्यापकत्वमेव निवेशनीयम् । तावतैव पर्याप्तिसंबन्धावच्छिन्नोभयत्वावच्छिन्नाभाववारणात् ।

(४९) नन्वेवमपि पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभाववारणमशक्यम् ।

(५०) न च जनिष्यमाणवह्निव्यक्तिषु तदभावीयप्रतियोगितायाः विरहात् साध्यतावच्छेदकाव्यापकत्वेन नायमभावो लक्षणघटक इति वाच्यम् ।

(५१) एतत्क्षणान्यक्षणावच्छिन्नवह्न्यभावमादाय दोषावारणात् भावि-भूतादियावद्व्यक्तिवह्निषु तत्प्रतियोगितासत्त्वादिति चेत्, न ।

(५२) विवक्षणीयनिरवच्छिन्नाभावाधिकरणताबलादेव सामञ्जस्यात् । तदभावाधिकरणतायाः हेतुमन्निष्ठायाः कालिकविशेषावच्छिन्न-त्वादिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(५३) नन्वेवमपि सत्तावान् जातिरित्यादावव्याप्तिः द्रव्यवृत्तित्वविशिष्टसत्तायाः अभाववति हेतोस्सत्त्वाद्विशिष्टशुद्धयोरैक्येन विशिष्टसत्तानिष्ठप्रतियोगितायाः सत्तात्वरूपसाध्यतावच्छेदकव्यापकत्वात्। व्यासज्यवृत्तिधर्मानवच्छिन्नत्वाच्चेति।

(५४) न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्येव वैशिष्ट्यानवच्छिन्नत्वस्यापि प्रतियोगिताविशेषणतयैव वारणमिति वाच्यम्।

(५५) विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताभावस्य वैशिष्ट्यानवच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया शुद्धसत्ताभावस्य तथात्वेऽपि तद्वति हेतोरवृत्त्यातिव्याप्तिः। एवं वह्निधूमोभयाभावस्य व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविरहेण धूमाभावस्य साध्यतावच्छेदकवह्निधूमोभयत्वव्यापकप्रतियोगिताकत्वविरहेण तयोर्लक्षणाघटकतया वह्निधूमान्यतरत्वद्रव्यत्वाद्यवच्छिन्नाभावस्य तथात्वेऽपि तद्वति हेतोरवृत्त्या वह्निधूमोभयवान् वह्नेरित्यादावपि सा।

(५६) न च साध्यतावच्छेदकातिरिक्तवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वात् विशिष्टसाध्यके व्यासज्यवृत्तिधर्मावच्छिन्नसाध्यके च व्यभिचारिणो विशिष्टाभावादिसङ्ग्रहः। सत्तावान् जातेः वह्निमान् धूमादित्यादौ विशिष्टाभावोभयाभाववारणमपि संभवतीति वाच्यम्।

(५७) एवमपि वह्निधूमोभयवान् वह्नेरित्यादौ अतिव्याप्तेर्दुर्वारत्वात्। वह्निधूमोभयत्वस्य धूमत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रतियोगिकाभावाप्रसिद्धेः। धूमत्वावच्छिन्नाभावस्य लक्षणाघटकत्वस्यानुपदमेवोक्तत्वादिति चेत्, न।

(५८) साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्य साध्याभावशब्दार्थत्वात्। तथा च वह्निमान् धूमादित्यादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वह्निपटोभयत्वस्य वह्निव्यापकतानवच्छेदकतया सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वस्य सत्ताव्यापकतानवच्छेदकतया न तदवच्छिन्नाभावमादाय दोषः । विशिष्टसत्तात्वधूमत्वादेः विशिष्टसत्तात्ववह्निधूमोभयत्वरूपसाध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकत्वात्तदच्छिन्नाभावमादाय विशिष्टसत्तावान् जातेः वह्निधूमोभयवान् वह्नेरित्यादौ अतिव्याप्तिवारणमपीति ध्येयम् ।

(५९) नन्वेवं सति कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिमभिधाया-भावाधिकरणतायां निरवच्छिन्नत्वविशेषणदानं ग्रन्थकर्तुरनुचितं प्रतिभाति । कपिसंयोगत्वस्य साध्यवति वृक्षे मूलावच्छेदेन वर्तमानाभावप्रतियोगितावच्छेदकतया व्यापकतानवच्छेदक-त्वात् । तादृशद्रव्यत्वत्वावच्छिन्नाभाववति हेतोरसत्त्वेन तत्रा-व्याप्तेरयोगादिति चेत्, न ।

(६०) कपिसंयोगी वृक्षत्वादित्यादौ व्यभिचारिणि साध्याभावस्योक्त-दिशा लक्षणाघटकतया तादृशवृक्षत्वत्वाद्यवच्छिन्नाभाववति हेतोरवृत्त्यातिव्याप्तिवारणाय साध्यवत्निष्ठाभावेत्यादिना साध्यवति निरवच्छिन्नवृत्तिकाभावप्रतियोगितानवच्छेदकत्वस्य विवक्षणीयतया कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभाव-स्यापि निरवच्छिन्नवृत्तित्वघटितनिरुक्तव्यापकतावच्छेदकताक-कपिसंयोगत्वावच्छिंन्नप्रतियोगिताकत्वेन लक्षणघटकतया तद्वति हेतोर्वृत्त्याऽव्याप्तिवारणाय तदावश्यकत्वात् ।

(६१) न च कपिसंयोगसाध्यकव्यभिचारिणि कपिसंयोगाभावमादायाति-व्याप्तेरवारणेऽपि व्याप्यवृत्तिकपिसंयोगावच्छिन्नप्रतियोगित्व-कपि संयोगप्रकारकप्रभाविषयत्वकपिसंयोगाधिकरणत्वादीनाम-भावमादाय तद्वारणसंभवात् । व्यर्थमेव व्यापकतावच्छेदकत्व-शरीरे निरवच्छिन्नत्वम् । तथा च न मूतोक्ताव्याप्त्यसङ्गति-रिति वाच्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६२) वस्तुमात्रस्यैव साध्यवन्निष्ठाभावीययथाकथञ्चित्संबन्धावच्छिन्नप्रतियोगितावत्तयाऽसंभववारणाय साध्यतावच्छेदकसंबन्धेन साध्यव्यापकत्वस्य विवक्षणीयतया कपिसंयोगाधिकरणत्वादीनां साध्यतावच्छेदकसमवायेन कपिसंयोगाव्यापकत्वेन तदभावानादायोक्तस्थलेऽतिव्याप्तेरवारणात् ।

(६३) यदपि तद्वृक्षान्यत्वविशिष्टद्रव्यत्वाभावमादाय तत्रातिव्याप्तिवारणसंभवात् । व्यापकताशरीरे निरवच्छिन्नत्वं नोपादेयमिति मूलाव्याप्त्यसङ्गतितादवस्थ्यमिति तत्तुच्छम् ।

(६४) तद्वृक्षान्यत्वोपलक्षितद्रव्यत्वाभावस्य तद्वृक्षे हेतुमत्यसत्त्वात् । विशिष्टाभावस्य तत्र सत्त्वेऽपि विशिष्टप्रतियोगिकसमवायावच्छिन्नप्रतियोगिताकस्य तस्य महानसानुयोगिकसंयोगेन वह्न्यभाववारकेतरवारकपर्याप्तिघटितसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वाभावात् । तादृशाभावमादायातिव्याप्तेरवारणात् । निरवच्छिन्नवृत्तिकत्वविवक्षणावश्यकत्वात् ।

(६५) न च तद्वृक्षसमवेतत्वावच्छिन्निसमवायसंबन्धावच्छिन्नाभावस्य निरुक्तव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकतया तमादायनातिव्याप्तिः । तद्वति तद्वृक्षे हेतोस्सत्त्वात् । न हि तद्वृक्षासमवेतत्वावछिन्नाभावोऽपि साध्यवत्येतद्वृक्षे संभवति तद्वृक्षासमवेतस्य व्याप्यवृत्तित्वरूपादेः तत्रसत्त्वादिति वाच्यम् ।

(६६) तद्वृक्षासमवेतस्यरूपादेः दैशिकव्याप्यवृत्तित्वेऽपि कालिकाव्याप्यवृत्तितया साध्यवत्युत्पत्तिकालावच्छेदेनाऽभावसत्त्वात् । तद्वृक्षासमवेतत्वावच्छिन्नाभावस्यापि लक्षणाघटकत्वादतिव्याप्तितादवस्थ्यात् ।

(६७) न च चूतनिम्बादिवृक्षाणां परस्परविजातीयतया साध्यवति चूते निम्बात्मकतद्वृक्षासमवेतत्वावच्छिन्नाभाव इति वाच्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६८) निम्बसामान्ये कपिसंयोगसंभवस्य कस्यापि निश्चेतुमशक्यतया कदाचित्कपिसंयोगाश्रये यत्किञ्चिन्निम्बे सर्वदा कपिसंयोगरहित निम्बासमवेतत्वावच्छिन्नाभावसत्त्वाच्चूतनिम्बयोरिव निम्बयोरपि परस्परवैजात्ये प्रमाणाभावात्। तस्य लक्षणाघटकतया कपिसंयोगी वृक्षत्वादित्यादावतिव्याप्तिवारणाय निरवच्छिन्नवृत्तिकत्वघटितव्यापकतायाः अवश्यं निवेशनीयत्वेन मौलाव्याप्ति सङ्गतिः।

(६९) ननु स्वरूपेणाधिकरणत्वविवक्षायां घटत्वाभाववान् पटत्वादित्यादौ घटत्वात्मकसाध्याभावस्य स्वरूपेणाधिकरणाप्रसिद्धावपि तद्घटभेदाभावस्यापि निरुक्तसाध्याभावतया तद्घटत्वरूपस्य तस्य स्वरूपेणाधिकरणत्वप्रसिद्ध्याऽव्याप्तिवारणसंभवात्तत्राव्याप्तिमाशङ्क्य साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धेन साध्याभावाधिकरणत्वविवक्षणमनुचितम्। न हि साध्याभावे यावत्त्वं निविष्टं प्रयोजनाभावादिति चेत्, न।

(७०) तद्घटत्वस्यापि तद्घटानुयोगिकसमवायेन घटत्वरूपतया तदात्मकतद्घटभेदाभावस्यापि स्वरूपेणाधिकरणत्वाप्रसिद्धेः तद्विवक्षणस्यावश्यकत्वात्।

(७१) न च तद्घटीयरूपध्वंसाभावाभावस्य निरुक्तसाध्याभावतया तद्घटीयरूपध्वंसस्य रूपस्य तस्य स्वरूपेणाधिकरणत्वप्रसिद्ध्या न घटत्वाभाववान् पटत्वादित्यत्राव्याप्तिरिति वाच्यम्।

(७२) यद्घटनाशादेव तदीयरूपादिनाशः तद्घटभेदसाध्यकसद्धेतावव्याप्तिरिति ग्रन्थतात्पर्यात्। तत्र तद्घटीयरूपध्वंसात्मकाभावस्याप्रसिद्धेः। तद्घटभेदाभावस्य च स्वरूपेणाधिकरणत्वाप्रसिद्धिरनुपदमेवावेदिता।

(७३) न च तत्रापि तद्घटीयरूपप्रागभावाभावाभावमादायाऽव्याप्तिश्शक्यत एव परिहर्तुम्। ध्वंसस्येव प्रागभावस्यापि प्रतियोग्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धिकरणता नियताधिकरणताकत्वात्तद्घटीयरूपाधिकरणीभूततद्घटमात्रवृत्तेः। तद्घटीयरूपप्रागभावस्यापि तद्घटातिरिक्तयावद्वृत्तितया साध्यव्यापकत्वेन तदभावात्मकस्य तद्घटीयरूपप्रागभावस्य लक्षणघटकत्वात्तस्य स्वरूपेण तद्घटे एवाधिकरणत्वप्रसिद्धेरिति वाच्यम्।

(७४) यद्घटस्य स्वोत्पत्तिद्वितीयक्षणे एव नाशः तद्घटभेदसाध्यक सद्धेतावव्याप्तावेव तात्पर्यात्। तत्र तद्घटवृत्तिप्रागभावादेरप्रसिद्धतया तद्घटभेदाभावस्यैव साध्याभावरूपताध्रौव्यात्। तस्य च स्वरूपेणाधिकरणाप्रसिद्धेः।

(७५) न च तद्घटोत्पत्तिक्षणे एव तद्घटनाशसामग्र्याः दुर्घटतया तत्स्थलेऽव्याप्तिरसङ्गतेति वाच्यम्।

(७६) यद्घटारम्भककपालद्वयमध्ये एककपाले प्रथमक्रिया कपालान्तरे च तृतीयक्षणे क्रियान्तरं यत्र तत्र प्रथमक्रियया तत्कपालद्वयसंयोगघटिततद्घटसामग्र्याः तच्चतुर्थक्षणे द्वितीयक्रियया च तत्कपालद्वयसंयोगनाशघटिततद्घटनाशकसामग्र्याः प्रथमक्रियापञ्चमक्षणे संभवात्। पञ्चमक्षणे षष्ठक्षणे च क्रमेण तद्घटतन्नाशयोरुत्पादसंभवात्।

(७७) यदि असमवायिकारणस्य कार्यसहभावेन कार्योत्पादकत्वं स्वीकृत्य तादृशघटोऽप्रामाणिक एवेति मन्यते।

(७८) तदा तद्गुणभिन्नं पटत्वादित्यादावव्याप्तिर्बोध्या तत्र तद्गुणवृत्तिध्वंसप्रागभावयोरप्रसिद्धेः तद्गुणभेदाभावस्यैव शरणीकर्तव्यतया तस्य च तद्गुणानुयोगिकसमवायेन गुणत्वात्मकस्य स्वरूपेणाधिकरणाप्रसिद्धेः।

(७९) न च तत्रापि तद्गुणभेदगुणत्वप्रकारकज्ञानविषयत्वान्यतराभावस्य गुणत्वज्ञानशून्यतादशायामेव तद्गुणमात्रवृत्तेः तद्गुण-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वानात्मकस्य स्वरूपेणाधिकरणत्वप्रसिद्ध्या नाव्याप्तिरिति वाच्यम् ।

(८०) गुणत्वप्रकारकेश्वरीयज्ञानविषयितायाः तद्गुणे सर्वदैव सत्त्वात् तद्गुणभेदस्य तद्गुणातिरिक्तवस्तुमात्रे सत्त्वात् तादृशान्यतराभावस्याप्रसिद्धेस्तमादायाव्याप्तेर्वारयितुमशक्यत्वात् ।

(८१) न च तथापि तत्क्षणवृत्तित्वतद्गुणभेदैतदन्यतराभावस्यतत्क्षणान्यक्षणावच्छेदेन तद्गुणवृत्तित्वे स्वरूपेणाधिकरणत्वप्रसिद्धया नाव्याप्तिः । न चास्यापि तद्गुणत्वस्वरूपत्वं तद्गुणत्वस्य तत्क्षणेऽपि सत्त्वेन तदानीमपि तत्क्षणवृत्तित्वतद्गुणभेदान्यतरत्वं नास्तीति प्रत्ययापत्तेरिति वाच्यम् ।

(८२) तस्यापि तत्क्षणान्यक्षणावच्छिन्नत्वविशिष्टतद्गुणत्वरूपेणैवातिप्रसङ्गभङ्गेऽतिरिक्तकल्पनाया अन्याय्यत्वात् । तद्गुणत्वस्वपस्य विशिष्टगुणत्वस्य स्वरूपेणाधिकरणत्वाप्रसिद्धिरुक्तैवेति ।

(८३) न च तद्गुणत्वावच्छिन्नप्रतियोगित्वाभावस्य तद्गुणभेदव्यापकतया तदभावस्य प्रतियोगित्वात्मकस्य स्वरूपेणाधिकरणत्वं प्रसिद्धमेवेति वाच्यम् ।

(८४) तद्गुणत्वावच्छिन्नप्रतियोगितायाः प्रतियोगितावच्छदकीभूततद्गुणत्वानतिरेकात् ।

(८५) न च तद्गुणत्वरूपस्यापि तस्य प्रतियोगितात्वेन स्वरूपेण वृत्तित्वं निर्विवादमेवेति वाच्यम् ।

(८६) घटत्वादेस्स्वरूपेणावृत्तित्वमभिदधतां मथुरानाथानां प्रतियोगितात्वेनाऽपि तद्गुणत्वादीनां स्वरूपेण वृत्तित्वस्याननुमतत्वात् । अन्यथा घटत्वादेरपि स्वावच्छिन्नप्रतियोगितारूपस्य प्रतियोगितात्वेन स्वरूपेण वृत्तित्वस्य सुवचत्वात् तेषां तदभिधानासङ्गतेः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(८७) न च साध्याभावत्वावच्छिन्नाधेयतायाः अग्रे विवक्षणीयतया घटत्वादेः प्रतियोगितात्वेन स्वरूपेणवृत्तावपि साध्याभावत्वेन स्वरूपेणाऽवृत्त्या घटत्वादीनामिव तद्गुणत्वादेरपि साध्याभावत्वेन स्वरूपेण वृत्तित्वाप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वात् । तेषां तदभिधानं सङ्गच्छत एवेति वाच्यम् ।

(८८) घटत्वादीनमपि प्रतियोगितात्वेनेव स्वाभावाभावत्वेनापि स्वरूपेणवृत्तित्वे बाधकाभावात् प्रतियोगितात्वेन वृत्तित्वं नत्वभावत्वेनेत्यभिधानस्य निर्युक्तिकत्वाच्च ।

(८९) वस्तुतस्तु घटत्वाभावप्रतियोगिकस्वरूपेण घटत्वाभावस्य साध्यतायां पटत्वहेतोर्तदघटभेदघटरूपध्वंसाभावतत्प्रागभावाभावादीनां साध्यतावच्छेदकघटत्वाभावप्रतियोगिकस्वरूपेण घटत्वाभावं प्रत्यव्यापकतया तदभावानां लक्षणाघटकत्वात् घटत्वात्मकाभावस्यैव शरणतया तस्य स्वरूपेणाधिकरणासिद्ध्याऽव्याप्तिरित्येवं तात्पर्यम् । तेन तद्गुणभेदाभावस्य तद्गुणानुयोगिकसमवायेन गुणत्वरूपत्वे तद्गुणवृत्तिगुणत्वावान्तरजातिसत्ताप्रमेयत्वादिकमादाय विनिगमनाविरहादतिरिक्तत्वस्यैव सयुक्तिकतया तस्य स्वरूपेणाधिकरणत्वप्रसिद्ध्या तद्गुणभिन्नं घटत्वादित्यादावप्यव्याप्त्यिसंभवेन ग्रन्थकृतां साध्याभावेत्यादिगुरुसंबन्धानुधावनं विफलमेवेति प्रत्युक्तम् ।

(९०) अथ साध्यवद्वृत्तित्वं स्वरूपेण वाच्यम् । अन्यथा वह्निमान् धूमादित्यादौ वह्नित्वादेरपि वह्निमत्पर्वतादौ कालिकादिसंबन्धेन वर्तमानाभावप्रतियोगितावच्छेदकतया व्यापकतावच्छेदकरूपाप्रसिद्धिप्रसङ्गात् । तथा च द्रव्यत्वाभाववान् गुणत्वादित्यादौ गुणत्वाभावाभावस्यापि साध्यवति स्वरूपेण वर्तमानाभावप्रतियोगितानवच्छेदकगुणत्वावच्छिन्नप्रतियोगिताकत्वेन लक्षणघटकतया साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगिताव-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्छेदकसमवायसंबन्धेन तद्वति गुणे गुणत्वहेतोस्सत्त्वादव्याप्तिः। साध्यवत्ताग्रहविरोधिताघटकसंबन्धेन साध्यवद्वृत्तित्वाभिधाने- च जात्यभाववान् जातित्वादित्यत्र साध्यवत्ताग्रहविरोधिताघटकसमवायेन साध्यवति सामान्यादौ वृत्तेरप्रसिद्ध्याव्याप्तिः। अत एव साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्वृत्तित्वविवक्षणमपि न संभवतीति चेत्, न।

(६१) स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धेन साध्यवद्वृत्तित्वविवक्षणात्। तदर्थश्च स्व प्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगितावच्छेदकसंबन्धावच्छिन्नप्रकारताशालिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसंबन्धः। स्वपदं साध्यवद्वृत्तित्वेनाभिमताभावपरं तथा च गुणत्वाभावाभावस्य तादृशेन समवायेन साध्यवति गुणादौ वर्तमानतया गुणत्वाभावत्वस्य तत्प्रतियोगितावच्छेदकतया न तदवच्छिन्नाभावमादाय द्रव्यत्वशून्यं गुणत्वादित्यत्राव्याप्तिः एवं जात्यभाववान् जातित्वादित्यत्र जातित्वाभावाभावस्य स्वप्रतियोगिजातित्वाभावग्रहविरोधिताघटकस्वरूपेण साध्यवति सामान्ये वर्तमानस्य प्रसिद्ध्या नाव्याप्तिः। अत्र प्रकारतायां प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशात् वह्न्यधिकरणतावान् धूमादित्यादौ वह्न्यधिकरणत्वाभावादेस्स्वप्रतियोगितावच्छेदकस्वरूपसंबन्धावच्छिन्नकालिकसंबन्धावच्छिन्नघटाभावनिष्ठप्रकारता - शालिग्रहविरोधिताघटककालिकेन साध्यवद्वृत्त्यभावीयप्रतियोगितावच्छेदकवह्न्यधिकरणतात्वावच्छिन्नप्रतियोगिताकत्वेऽपि न क्षतिः। प्रतियोगितावच्छेदकसंबन्धावच्छिन्नत्वनिवेशाच्च कालिकसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयत्वाभावे स्वप्रतियोगिककालिकेन साध्ये जन्यत्वादिहेतौ साध्यतावच्छेदकप्रमेयत्वाभावप्रतियोगिककालिकेन प्रमेयत्वाभावाभावस्य स्वप्रतियोगितावच्छेदकप्रमेयत्वाभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्न -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकारताकग्रहविरोधिताघटककालिकेन साध्यवति जन्ये वृत्तावपि नाव्याप्तिः । प्रतिबध्यतायां ग्रहत्वावच्छिन्नत्वानिवेशाच्चवह्न्यधिकरणत्वाभावस्य स्वप्रतियोगितावच्छेदक वह्न्यधिकरणतात्वावच्छिन्नतादृशस्वरूपसंबन्धावच्छिन्नप्रकारताकपर्वतः वह्न्यधिकरणतावान् कालिकावच्छिन्नघटाभाववांश्चेति समूहालम्बनवृत्तिकालिकेन घटाभावविषयकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकेन कालिकेन साध्यवद्वृत्तित्वेऽपि वह्न्यधिकरणतावान् धूमादित्यादौ पुनर्नाव्याप्तिः ।

(६२) अथ वह्न्यभावस्य कालिकसंबन्धावच्छिन्नस्वाभावनिष्ठस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावरूपतया स्वनिरूपितस्वाभावनिष्ठप्रतियोगितावच्छेदकस्वरूपसंबन्धेन स्वाभावात्मकस्वप्रतियोगिमत्ताग्रहविरोधिताघटकेन कालिकेन साध्यवति वर्तमानतया वह्निमान् धूमादित्यादावव्याप्तिरिति चेत्, न ।

(६३) स्वप्रतियोगिमत्तेत्यादौ स्वनिरूपितप्रतियोगितायाः साध्यवन्निष्ठाभावप्रतियोगितायाश्चैक्यविवक्षया दोषाभावात् । तथा च स्वावच्छेदकसंबन्धावच्छिन्नस्वावच्छेदकावच्छिन्नप्रकारताकग्रहत्वावच्छिन्नविरोधिताघटकसंबन्धेन साध्यवद्वृत्त्यभावीयस्वात्मकप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववद् - वृत्तित्वाभाव इति फलितार्थः । तथा च वह्नित्वावच्छिन्नसंयोगसंबन्धावच्छिन्नप्रतियोगितायाः स्वावच्छेदकावच्छिन्नवत्ताबुद्धिविरोधिताघटकस्वरूपेण साध्यवद्वृत्त्यभावीयत्वाभावात् न स्वपदार्थत्वं किन्तु घटादिनिष्ठप्रतियोगिताया एव, तदनवच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावस्य धूमे सत्त्वाद्वह्निमान् धूमादित्यादौ लक्षणसमन्वयः ।

(६४) अथैवमपि विशिष्टसत्ताभाववान् गुणत्वादित्यादौ साध्यवति गुणे वर्तमानसत्तात्मकविशिष्टसत्ताभावाभावप्रतियोगितावच्छेदक -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशिष्टसत्ताभावत्वावच्छिन्नाभावस्य व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया तादृशद्रव्यत्वात्मकाभाववति हेतोरवृत्त्याऽव्याप्तिविरहादग्रे तत्राव्याप्तिमाशङ्क्य अधिकरणतायां साध्याभावत्वावच्छिन्ननिरूपितत्वविवक्षणमफलमिति चेत्, न ।

(९५) तद्रूपान्यत्वविशिष्टसत्ताभाववांस्तद्रूपत्वादित्यादौ साध्याभावस्योक्तदिशा लक्षणाघटकतया तद्रूपान्यत्वाभावाभावस्य लक्षणघटकत्वेऽपि तस्य साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसमवायेनाधिकरणाप्रसिद्ध्याऽव्याप्तेर्वारणाय साध्यवद्वृत्तितावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वस्य निर्वाच्यतया विशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टसत्ताभावाभावत्वावच्छिन्ननिरूपकताकाधिकरणतायास्साध्यवति गुणेऽसत्त्वेन विशिष्टसत्ताभावाभावस्यापि लक्षणघटकतया सत्तात्वेन तद्वति गुणे गुणत्वस्य वृत्त्या अव्याप्तिवारणायाधिकरणतायां साध्याभावत्वावच्छिन्ननिरूपितत्वावश्यकत्वात् ।

(९६) केचित्तु व्यापकतावच्छेदकत्वमवश्यं साध्यतावच्छेदकतावच्छेदकसंबन्धेन वाच्यम् । अन्यथा वह्नित्वादेरपि साध्यवन्निष्ठाभावीयप्रतियोगितायां विषयितयावच्छेदकत्वाद्व्यापकतावच्छेदकत्वानुपपत्तेः । तथा च वह्नित्वप्रतियोगिकसमवायेन वह्नित्वस्य साध्यतावच्छेदकतायां सद्धेतावव्याप्तिः । वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टाभावस्य पर्वतादावभावात् वह्नित्वप्रतियोगिकसमवायेन घटत्वविशिष्टस्याप्रसिद्ध्या तदभावासंभवात् साध्यवन्निष्ठाभावीयप्रतियोगितानिरूपितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वाप्रसिद्धेरिति पूर्वपक्षयन्ति । तन्न ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६७) प्रतियोगितावच्छेदकताघटकसंबन्धेन व्यापकतावच्छेदकत्वविवक्षणेन शुद्धसमवायसंबन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादाय लक्षणसमन्वयात्। तत्प्रतियोगितावच्छेदकवह्नित्वस्य तत्प्रतियोगितावच्छेदकतावच्छेदकशुद्धसमवायसंबन्धावच्छिन्नसाध्यवन्निष्ठाभावीयप्रतियोगितानिरूपित - घटत्वनिष्ठावच्छेदकताशून्यत्वस्य सत्त्वेन तदभावस्य लक्षणघटकत्वात्।

(६८) अथ साध्यव्यापकतावच्छेदकत्वं न साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकनिष्ठप्रतियोगिताक भेदः। तथा सति तादृशावच्छेदकपटत्वभेदमादाय घटकत्वादेरपि व्यापकतावच्छेदकत्वापत्तेः। किन्तु साध्यतावच्छेद्रकावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताक भेदः। तथा च प्रमेयवह्निमान् धूमादित्यादौ गुरोरनवच्छेदकत्वमतेऽव्याप्तिस्तदवस्थैव वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरोः प्रमेयवह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यानवच्छेदकत्वादितिचेदत्र वदन्ति।

(६९) साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकानि यावन्ति प्रत्येकं तत्तदवच्छिन्नप्रतियोगिताकभेदकूटवत्वं साध्यव्यापकतावच्छेदकत्वं न तु तादृशावच्छेदकसामान्यभेदः। तथा च घटत्वनिष्ठावच्छेदकताया अपि यावदन्तर्गततया तदवच्छिन्नभेदघटितकूटासत्त्वान्न घटत्वस्य व्यापकतावच्छेदकत्वम्। प्रमेयवह्निमन्निष्ठाभावप्रतियोगितावच्छेदकसामान्यभेदस्या - प्रसिद्धावपि तत्तदवच्छेदकत्वावच्छिन्न भेदकूटात्मकप्रमेयवह्निव्यापकतावच्छेदकत्वस्य वह्नित्वादौ सत्त्वान्न गुरोरवच्छेदकत्वं विना व्याप्तेर्दुर्वचत्वम्। अस्यायमनुगमः। प्रतियोगिताविशिष्टसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभाववद् - वृत्तित्वाभावोव्याप्तिः। प्रतियोगितावैशिष्ट्यञ्च स्वतादात्म्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वविशिष्टावच्छेदकतानिष्ठोभयावृत्तिधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिसमुदायत्वावच्छिन्नाधिकरणताकत्वोभयसंबन्धेन। अत्र स्वपदं साध्याभावीयप्रतियोगितापरम्। द्वितीयसंबन्धघटकीभूतावच्छेदकतायां स्ववैशिष्ट्यञ्च स्वावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वस्वकालीनसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताविशिष्टप्रतियोगितानिरूपितत्वोभयसंबन्धेन। अत्रापि स्वपदं साध्याभावीयप्रतियोगितापरमेव। प्रतियोगितायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसंबन्धघटकीभूतावच्छेदकतायां स्ववैशिष्ट्यनियामकद्वितीयसंबन्धघटकीभूतस्वसमानकालीनप्रतियोगितावैशिष्ट्यञ्च स्वतादात्म्यस्वविशिष्टप्रकारताशालिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसंबन्धावच्छिन्नसाध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकानुयोगितानिरूपितत्वोभयसंबन्धेन। अत्र स्वपदं साध्यवद्वृत्त्यभावीयप्रतियोगितापरम्। स्ववैशिष्ट्यञ्च प्रकारतायां स्वावच्छेदकावच्छिन्नत्वस्वावच्छेदकसंबन्धावच्छिन्नत्वोभयसंबन्धेन अत्रापि स्वपदं साध्यवद्वृत्त्यभावीयप्रतियोगितापरमेव। एतेन भेदकूटस्यासर्वज्ञदुर्ज्ञेयत्वात्तद्घटितव्याप्तेर्दुर्ग्रहत्वम्। एवं यावत्वतत्वघटितायाः निरुक्तव्याप्तेर्विशिष्टैकार्थरूपत्वाभावेनानुमित्यनुपयोगित्वमित्यादिदूषणं परास्तमिति बोध्यम्। इत्यलमनल्पकल्पसाध्यतावच्छेदकावच्छिन्नत्वशाखोपशाखामार्गणेन।

साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्त्वं निवेशनीयमिति माथुरी। अथात्र कालिकसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावस्य कालिकेन साध्यतायां जन्यत्वहेतावव्याप्तिः। साध्यनिरूपिताया कालिकसंबन्धावच्छिन्नाप्रतियोगिता तस्याः प्रमेयसामान्यनिष्ठायाः कालिकसंबन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसंबन्धावच्छिन्नाभावः तदात्मकाति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिक्तसाध्याभावनिष्ठतया तदवच्छेदककालिकसंबन्धेनातिरिक्तसाध्याभाववति जन्ये जन्यत्वस्य सत्त्वात्। एवं कालिकसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपेण साध्यतायां गगनत्वहेतावव्याप्तिः। साध्यस्य यः कालिकेनाभावः तस्य स्वरूपेणाभावस्य साध्यरूपतया तदीयप्रतियोगितावच्छेदकस्वरूपेण प्रमेयात्मकसाध्याभाववति गगने गगनत्वस्य सत्त्वात्। न च तत्प्रतियोगितायां निरुक्तसाध्याभाववृत्तित्वन्नेति शक्यम्। साध्यतावच्छेदकसंबन्धेन साध्याभावस्य प्रमेयसामान्यरूपकतया तत्प्रतियोगिताश्रयीभूताभावस्यापि साध्याभावरूपत्वात्। यत्तु साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्वं विवक्षणीयम्। तेनोक्तप्रथमस्थले प्रमेयत्वावच्छिन्नप्रतियोगितायाः, द्वितीयस्थले कालिकावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रतियोगितायाश्च। निरुक्तसाध्याभावत्वावच्छिन्नत्वविरहेण न तादृशप्रतियोगित्वे आदाय पूर्वोक्ताव्याप्त्योरवकाश इति। यदपि साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वसमनैयत्यं साध्यसामान्यीयप्रतियोगितायां निवेशनीयम्। तथा च प्रथमे प्रमेयत्वावच्छिन्नप्रतियोगितायाः अतिरिक्ताभावमात्रवृत्तिनिरुक्ताभावत्वाव्याप्यतया द्वितीये च कालिकेन प्रमेयाभावस्य यः कालिकसंबन्धावच्छिन्नाभावः तन्निष्ठस्वरूपसंबन्धावच्छिन्नप्रतियोगितायाः केवलान्वयिनिरुक्तसाध्याभावत्वाव्यापकतया नोक्तदोषद्वयावकाश इति तदुभयमपि न मनोरमम्। प्रतियोगितायां वक्ष्यमाणात्यन्ताभावत्वनिरूपितत्वस्य वैफल्यापत्तेः। घटभिन्नं घटत्वत्वादित्यादौ घटभेदीयघटत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्न प्रतियोगितायाः साध्यतावच्छेदकसंबन्धेन साध्याभावत्वावच्छिन्नत्वविरहेण प्रथमकल्पे घटत्वसाधारणसाध्यतावच्छेदकसंबन्धेन साध्याभावत्वव्यापकत्वविरहेण द्वितीयकल्पे वा लक्षणाघटकतया तामादायाव्याप्त्यसंभवात्। न वा घटभेदाभावत्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावः घटत्वव्यावृत्तः घटत्वसाधारणघटभदस्वरूपः। येन तदीयप्रतियोगितावच्छेदकतादात्म्येन घटत्वरूप-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साध्याभाववति घटत्वे घटत्वत्वस्य वृत्त्या तत्राव्यप्तिस्संभाव्येत। न च घटानुयोगिकसंबन्धेन घटभेदाभावत्वस्य घटे एव वृत्त्या तेन संबन्धेन तदवच्छिन्नभेदोऽपि घटभेद एव। तथा च प्रथमकल्पे घटभेदाभावत्वनिष्ठ-घटानुयोगिकस्वरूपसंबन्धावच्छिन्नावच्छेदकताकतादात्म्यसंबन्धावच्छिन्न-प्रतियोगिताया अपि लक्षणघटकतया तदवच्छेदकतादात्म्येन घटत्वरूपसाध्याभावाधिकरणतामादायाव्याप्तिवारणायात्यन्ताभावत्वनिरूपितत्वरूप-विशेषणस्य सार्थक्यमिति वाच्यम्। कालिकसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपेण साध्यतायां गगनत्वहेतौ साध्यस्य यः कालिकेनाभावः तदनुयोगिकस्वरूपेण कालिकावच्छिन्नप्रमेयत्वावच्छिन्न-प्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसंबन्धेनाभावत्वविशिष्टस्य यः स्वरूपेणाभावः तस्यास्साध्यरूपतया तदीया या अतिरिक्ताभावानुयोगिक-स्वरूपसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिता तदवच्छेदकस्वरूपसंबन्धेन प्रमेयरूपसाध्याभाववति गगने गगनत्वस्य वृत्त्याऽव्याप्तिवारणाय शुद्धस्वरूपसंबन्धावच्छिन्ना या साध्यतावच्छेदकसंबन्धेन साध्याभावत्वनिष्ठावच्छेदकता, तन्निरूपितप्रतियोगिताया एव लक्षणे निवेशनीयतया घटानुयोगिकस्वरूपसंबन्धावच्छिन्नघटभेदाभावत्वनिष्ठावच्छेदकताकप्रतियोगितामादायापि घटभिन्नं घटत्वत्वादित्यादावव्याप्त्यसंभवात् तद्वैयर्थ्यस्य दुर्वारत्वादिति चेदत्रोच्यते। साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्वव्याप्यसाध्यतावच्छेदकातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वानवच्छिन्ना च या साध्यसामान्यीयप्रतियोगिता तदवच्छेदकसंबन्धेन साध्याभाववत्वं विवक्षितम्। तथा च कालिकेन प्रमेयाभावस्य कालिकेन साध्यतायां जन्यत्वहेतौ साध्यीयप्रमेयत्वावच्छिन्न-प्रतियोगितायाः अतिरिक्ताभावमात्रवृत्तिनिरुक्ताभावत्वाव्याप्यत्वात्। तस्य स्वरूपेण साध्यतायां गगनत्वहेतौ साध्यस्य यः कालिकेनाभावः तस्य स्वरूपेणाभावीयप्रतियोगितायाः केवलान्वयिनिरुक्तसाध्याभावत्वव्याप्यत्वेऽपि साध्यतानवच्छेदककालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वानवच्छिन्नत्वविरहान्नाव्याप्तिः। इत्थं च घटभिन्नं घटत्वत्वादित्यादौ घटभेदीयघटत्वावच्छिन्नप्रतियोगितायाः घटघटत्वोभयसाधारणसाध्याभावत्वव्याप्यतया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वानवच्छिन्नतया च
तामादायाव्याप्तिवारणायात्यन्ताभावत्वनिरूपितत्वविशेषणस्य सार्थक्यम् ।
यदि च कालिकेन प्रमेयाभावस्य स्वरूपेण साध्यतायां सद्धेतौ साध्यस्य
कालिकेन योऽभावः तन्निष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः साध्यता-
वच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वानवच्छिन्न-
तया तदवच्छेदकस्वरूपसंबन्धमादायाव्याप्तिस्तदवस्थैव । न च साध्यसामा-
न्यीयप्रतियोगितायां किञ्चित्प्रतियोगिताकाभावत्वावच्छिन्नत्वमपि
निवेशनीयम् । तथा चोक्तस्थलेऽतिरिक्ताभावनिष्ठतद्व्यक्तित्वावच्छिन्न-
प्रतियोगिताव्युदासः । एवञ्च घटभिन्नं घटत्ववत्वादित्यादौ घटभेदीयघट-
निष्ठप्रतियोगितायाः किञ्चित्प्रतियोगिताकाभावत्वानवच्छिन्नत्वेन तामा-
दायाव्याप्तिवारकतया अत्यन्ताभावत्वनिरूपितत्वविशेषणस्य सार्थक्या-
संभवेऽपि स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकजातित्वाभावभिन्नं तादृश-
जातित्वाभावत्ववत्वादित्यादौ साध्यीयजातित्वाभावनिष्ठतादात्म्यसंबन्धा-
वच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकस्वरूपसंबन्धातिरिक्तसंबन्धाव-
च्छिन्न प्रतियोगिताकाभावत्वानवच्छिन्नतया जातित्वनिष्ठप्रतियोगिता-
रूपकिञ्चित्प्रतियोगिताकाभावत्वावच्छिन्नतया तदवच्छेदकतादात्म्यसंब-
न्धेन जातित्वाभावरूपसाध्याभाववति जातित्वाभावत्वे हेतोस्सत्त्वादव्या-
प्तिवारकतया तत्सार्थक्यमपि संभवतीति वाच्यम् । कालिकेन प्रमेयाभावस्य
स्वरूपेण साध्यतायां सद्धेतौ गगनवृत्तित्वविशिष्टसाध्यस्य यः स्वरूपेणा-
भावः तस्य स्वरूपेणाभावस्यापि साध्यरूपतया तदीयप्रतियोगितायास्साध्य-
तावच्छेदकस्वरूपसंबन्धातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकाभावात्वान-
वच्छिन्नतया स्वरूपसंबन्धावच्छिन्नविशिष्टसाध्यनिष्ठप्रतियोगितारूप-
किञ्चित्प्रतियोगिताकाभावत्वावच्छिन्नतया तदवच्छेदकस्वरूपसंबन्धमादाय
दोषवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्न-
प्रतियोगिताभिन्नप्रतियोगिताकाभावत्वानवच्छिन्नसाध्याभावत्वव्याप्य -
किञ्चित्प्रतियोगिताकाभावत्वावच्छिन्नसाध्यसामान्यीयप्रतियोगितावच्छेद-
कसंबन्धेन साध्याभाववत्वस्यैव निवेशनीयतया जातित्वाभावभेदसाध्यक-
निरुक्तहेतावपि साध्यीयजातित्वाभावनिष्ठप्रतियोगितायास्साध्यतावच्छेद-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताभिन्नजातित्वत्वावच्छिन्नप्रतियोगिताकाभाकत्वावच्छिन्नतया तामादायाव्याप्तिवारणाय तद्वैयर्थ्यस्य दुर्वारत्वादित्युच्यते। तदा साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छे:कावच्छिन्नप्रकारताशालिग्रहप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकावच्छिन्नसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धावच्छिन्न - साध्याभाववत्वं निवेशनीयम्। इत्थं च कालिकेन प्रमेयाभावस्य स्वरूपेण साध्यतायां गगनत्वहेतौ साध्यनिष्ठसंबन्धान्तरावछिन्नप्रतियोगिताकाभावत्वतादृशाभावगततद्व्यक्तित्वावच्छिन्नप्रकारताशालिनिश्चयस्य साध्यतावच्छेदकरूपेण साध्यतावच्छेदकसंबन्धेन साध्यवत्ताबुद्ध्यप्रतिवन्धकतया न तदवच्छिन्नप्रतियोगितामादायाव्याप्तिः। घटभिन्नं घटत्वत्वादित्यादौ घटभेदवत्ताबुद्धिं प्रति तादात्म्येन घटवत्तानिश्चयस्य प्रतिबन्धकतया घटत्वावच्छिन्नघटभेदीयप्रतियोगितायाः लक्षणघटकतया तदवच्छेदकतादात्म्यसंबन्धेन घटत्वरूपसाध्याभावाधिकरणत्वमादायाव्याप्तिवारणायात्यन्ताभावत्वनिरूपितत्वविशेषणसार्थक्यमपीति सर्वं सुस्थम्। ननु तथापि उभयत्वमुभयत्रैव पर्याप्तं नत्वेकत्रेतिसिद्धान्तादरे घटत्वान् घटपटोभयत्वादित्यादौ पर्याप्त्याख्यसंबन्धेनोभयत्वहेतुकेऽतिव्याप्तिः। घटत्वाभाववति पटे पर्याप्त्याख्यसंबन्धेन हेतोरवृत्तेः। घटो न घटपटोभयमितिवत् पटो न घटपटोभयमिति प्रतीतेरिति चेत्, नेति माथुरी। नन्वत्रोभयत्वमुभयत्रैव पर्याप्तं नत्वेकत्रेत्यस्य उभयत्वं उभयवृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तितावत् नत्वेकवृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तितावदित्यर्थः। न तु यथाश्रुतः उभयत्वमुभयवृत्ति न त्वेकवृत्तीत्यर्थः। उभयस्य प्रत्येकानतिरेकादुभयवृत्तित्वे प्रत्येकवृत्तिताऽनपायात् असाङ्गत्यापत्तेः। तथा च घटत्वाभाववत्पटनिरूपितघटपटोभयत्वावच्छिन्ननिरूपकताकवृत्तित्वस्य घटपटोभयत्वे सत्त्वेन घटत्ववान् घटपटोभयत्वादित्यादावतिव्याप्त्यभिधानमसङ्गतमिति चेत्, न। एकधर्मावच्छिन्नाधेयताया ऐक्यमते वह्न्यभाववद्धदादिनिरूपितद्रव्यत्वावच्छिन्नवृत्तितामादाय वह्निमान् धूमादित्यादावव्याप्तिपरिहाराय साध्याभाववन्मात्रवृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तित्वाभाव एव विवक्षणीयः। तथा च द्रव्यत्वावच्छिन्नाधेयतानिरूपकतायाः यावद्द्रव्यनिष्ठायाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वान्यूनवृत्तिद्रव्यत्वावच्छिन्नायाः वह्न्यभाववन्मात्रवृत्तिधर्मावच्छिन्नत्वविरहेण तामादाय वह्निमान् धूमादित्यादेरव्याप्तेरिव घटपटोभयत्वनिष्ठाधेयतानिरूपकताया अपि घटत्वाभाववन्मात्रवृत्तिधर्मावच्छिन्नत्वविरहेण तामादायोक्तातिव्याप्तिपरिहारस्यापि वक्तुमशक्यत्वात् । न चैकधर्मावच्छिन्नाधेयताया ऐक्याभ्युपगमे ह्रदत्वादेरपि वह्न्यभाववन्मात्रवृत्तित्वं दुर्घटम् तस्य वह्निमत्पर्वतादौ प्रमेयत्वादिना वृत्तेः । तथा च साध्यध्याभाववदवृत्तिधर्मावच्छिन्नत्वपर्यवसन्ननिरुक्तधर्मावच्छिन्नत्वाप्रसिद्ध्या असंभवात् । तदनभ्युपगमेनैव तल्लक्षणस्य आवश्यकतया यथाश्रुतलक्षणे निरुक्ताव्याप्तेरभावात् । निरुक्तपरिष्कारानावश्यकत्वेनातिव्याप्त्यसङ्गतितादवस्थ्यमिति वाच्यम् । साध्याभाववन्निष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावस्याव्याप्तित्वेनापि द्रव्यत्वावच्छिन्नाधेयतामादायाव्याप्तिवारणसंभवात् । एकधर्मावच्छिन्नाधेयत्वैक्याभ्युपगमस्यानौचित्यात् । तथा च घटत्वाभाववत्पटनिष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावस्य घटपटोभयत्वहेतौ सत्त्वेनातिव्याप्तिसङ्गतिरिति । न चैवं द्रव्यं सत्त्वादित्यादावतिव्याप्तिः । सत्तारूपहेतुनिष्ठाधेयतानिरूपकतायाः यावत्साध्यवन्निष्ठायाः स्वान्यूनवृत्तिना सत्त्वेन एवावच्छिन्नतया साध्याभाववन्निष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावस्य सत्तायामक्षतत्वादिति वाच्यम् । केवलसत्तात्वावच्छिन्नाधेयतानिरूपकतायाः यावत्साध्यनिष्ठत्वेऽपि तद्गुणवृत्तित्वविशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपकतायाः तद्गुणमात्रनिष्ठायाः स्वान्यूनवृत्तिना तद्गुणनिष्ठैकत्वेनानवच्छिन्नतया द्रव्यात्वाभाववत्तद्गुण निष्ठैकत्वावच्छिन्ननिरूपितनिरुक्ताधेयतामादायातिव्याप्तेर्वारण - संभवात् । न चैवं साध्यसामानाधिकरण्यं न यथाश्रुतम् । तथा सति घटपटोभयत्वस्य साध्यवद्घटनिरूपितोभयत्वावच्छिन्ननिरूपितवृत्तित्वसत्त्वेन तद्विशेषणेनाप्यतिव्याप्तेरवारणात् । किन्तु साध्यवन्मात्रवृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तित्वम् । तत्र साध्यवन्मात्रवृत्तित्वञ्च साध्याभाववदवृत्तित्वम् । तथा च यद्येकधर्मावच्छिन्नाधेयतैका तदा पर्वतत्वादेरपि साध्याभाववति ह्रदादौ प्रमेयत्वादिना वृत्तितया साध्यवन्मात्रवृत्तित्वासंभवेन तदनभ्युपगमस्यावश्यकत्वात् प्रथममेव तत्परित्यागौचित्येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथाश्रुतलक्षणे वह्निमान् धूमादित्यादावव्याप्त्यसंभवात् निरुक्तपरिष्कारानवश्यकत्वेनातिव्याप्त्यसंगतिः तदवस्थैव। यदि साध्यसामानाधिकरण्यशरीरेऽपि साध्यवन्निष्ठनिरूपकतायां साध्यवन्मात्रवृत्तिधर्मावच्छिन्नत्वमपहायैकत्वावच्छिन्नत्वनिवेशनेन घटपटोभयत्वस्य साध्यवद्घटनिष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावेनातिव्याप्तिवारणमित्युच्यते तदा द्रव्यं घटपटोभयत्वादित्यादौ सद्धेतावव्याप्तिः। हेतौ द्रव्यत्ववन्निनिष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावादिति वाच्यम्। साध्यवन्मात्र वृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तित्वमेव साध्यसामानाधिकरण्यम्। तत्र साध्यवन्मात्रवृत्तित्वञ्च साध्याभाववन्निष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभावः। इत्थं च द्रव्यत्वाभावान् यो गुणादिः। तन्निष्ठैकत्वाव छिन्ननिरूपकताकवृत्तित्वाभाववान् यो धर्मः घटपटोभयत्वम् तदवच्छिन्ननिरूपकताकवृत्तित्वं घटपटोभयत्वे वर्तत इति द्रव्यं घटपटोभयत्वादित्यादौ अव्याप्त्यसंभवात्। तादृशधर्मेऽव्यासज्यवृत्तित्वं विशेषणम्। तेन घटत्ववान् घटपटोभत्वादित्यादौ साध्याभाववत्पटनिष्ठैकत्वावच्छिन्ननिरूपकताकवृत्तित्वाभाववद्घटपटोभयत्वरूपव्यासज्यवृत्तिधर्मावच्छिन्न - निरूपकताकवृत्तित्वेऽपि नातिव्याप्तिः। द्रव्यं घटपटोभयत्वादित्यादौ घटपटोभयत्वस्याव्यासज्यवृत्तित्वाभावेऽपि घटपटान्यतरत्वस्याव्यासज्यवृत्तितया निरुक्तसाध्यवन्मात्रवृत्तितया तदवच्छिन्ननिरूपकताकवृत्तित्वस्योभयत्वे सत्त्वान्नाव्याप्तिः। न च व्यासज्यवृत्तिधर्मनिष्ठाधेयतानिरूपकत्वे तत्पर्याप्त्यनुयोगित्वरूपेणनाऽव्यासज्यवृत्तिधर्मोऽवच्छेदक इति कथं घटपटान्यतरत्वमादायोक्तस्थले लक्षणसमन्वय इति वाच्यम्। अव्यासज्यवृत्तेरपि व्यासज्यवृत्तिधर्मपर्याप्त्यनुयोगितावच्छेदकतया आवश्यकत्वात्। कथमन्यथा घटावित्याकारकस्य घटत्वावच्छिन्नानुयोगिताकपर्याप्तिसंबन्धेन घटत्वावच्छिन्ने द्वित्वप्रकारकप्रत्ययस्य प्रमात्वम्। न च तत्प्रत्यये शुद्धपर्याप्तिसंबन्धेन द्वित्वं प्रकार इति शक्यते वक्तुम्। तथा सति गगने गगनानीति प्रत्ययानामपि प्रमात्वापत्तेः। गगनेऽपि इतरसाधारणद्वित्वादेरबाधितत्वादिति पर्याप्तिसंबन्धेन द्वित्वादिप्रकारकप्रत्ययस्योद्देश्यतावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिसंसर्गकत्वनियमस्यावश्यभ्युपेयत्वादिति सर्वं चतुरस्रम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति लक्षणे। साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति प्राचीनानुमतकर्मधारयपक्षः साध्याभावपदवैयर्थ्यदूषणेन दूषितो मथुरानाथेन। अयमाशयः। साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वाभावस्य स्वसमानाधिकरणं स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्व्याप्यतावच्छेदकीभूतसाध्यवद्भिन्नवृत्तित्वाभावत्वं तद्घटितत्वेन व्याप्यतानवच्छेदकतया इतरभेदसाधने ताद्रूप्येण हेतुतायां व्याप्यत्वासिद्धिरिति। न च साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वाभावः न तादृशवृत्तित्वनिष्ठप्रतियोगिताकाभावमात्रम्। वृत्तित्वविशेषाभावमादाय व्यभिचारिण्यतिप्रसङ्गापातात्। किन्तु तादृशवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावः। एवं साध्यवद्भिन्नवृत्तित्वाभावोऽपि साध्यवद्भिन्ननिरूपितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाव एव। तथा च साध्यवद्भिन्नसाध्याभाववद्वृत्तितात्वावच्छिन्नाभावत्वयोः प्रतियोगितावच्छेदकशरीरे साध्याभावघटनाघटनाभ्यां विभिन्नाभावमात्रनिष्ठयोः परस्परसानाधिककरण्यविरहात्। परस्परघटितत्वविरहेण च न साध्यवद्भिन्नसाध्याभाववद्वृत्तितात्वावच्छिन्नप्रतियोगिताकाभावत्वस्य व्याप्यतावच्छेदकत्वहानिरिति वाच्यम्। वृत्तित्वविशेषाभावमादाय व्यभिचारिण्यति व्याप्तिवारणाय विवक्षिते साध्यवद्भिन्नसाध्याभाववद्वृत्तितात्वावच्छिन्नप्रतियोगिताकाभावत्वसाध्यवद्भिन्नवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावत्वे साध्यवद भेदनिष्ठावच्छेदकतानिरूपकसाध्याभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावत्वसाध्यवद्भेदनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकवृत्तितात्व - च्छिन्नप्रतियोगिताकाभावत्वरूपे साध्यवद्भेदनिष्ठावच्छेदकताकसाध्याभावनिष्ठावच्छेदकताकाधिकरणनिष्ठावच्छेदकताकवृत्तितात्वावच्छिन्नप्रति योगिताकाभावत्वाश्रयेऽभावेऽधिकन्त्वित्यादिन्यायेनसाध्यवद्भेदनिष्ठावच्छेदकताकाधिकरणनिष्ठावच्छेदकताकवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाव त्वसत्त्वात्सामानाधिकरण्यस्य सत्त्वात्साध्यवद्भेदनिष्ठावछेदकतानिरूपितत्वसाध्याभावनिष्ठावच्छेदकतानिरूपितत्वोभयरूपेणाधिकरणनिष्ठावच्छेद - कताघटितप्रथमधर्मस्य साध्यवद्भेदनिष्ठावच्छेदकतानिरूपितत्वेनाधिकरण-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निष्ठावच्छेदकताघटितप्राङ्निरुक्तद्वितीयधर्मघटितत्वसत्त्वेन प्रथमधर्मस्य-व्याप्यतानवच्छेदकत्वस्य दुर्वारत्वात् । न च साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वाभावसाध्यवद्भिन्नवृत्तित्वाभावौ यदिसाध्यवद्भेदनिष्ठावच्छेदकताकसाध्याभावनिष्ठावच्छेदकताकाधिकरणनिष्ठावच्छेदकताकवृत्तितात्वावच्छिन्नप्रयोगिताकाभावसाध्यवद्भेदनिष्ठावच्छेदकताकाधिकरणनिष्ठावच्छेदकताकवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावरूपौ तदा व्यभिचारिणि धूमवद्भिन्नधूमाभाववद्ध्रदनिरुपितवृत्तित्वं नास्तीति-प्रतीतिसिद्धाभावञ्चादायातिव्याप्तिः । अतस्साध्यवद्भेदनिष्ठावच्छेदकताभिन्ना साध्याभावनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका सती साध्यवद्भेदनिष्ठावच्छेदकतानिरूपिका याधिकरणनिष्ठावच्छेदकता तन्निरूपकवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावसाध्यवद्भेदनिष्ठावच्छेदक ताभिन्नावच्छेदकत्वानिरूपिका सती साध्ववद्भेद निष्ठावच्छेदकतानिरूपिका साऽधिकरशनिष्ठावच्छेदकता, तन्निरूपकवृत्तितात्त्वावच्छिन्नप्रतियोगिताकाभावरूपौ रूपौ वाच्यौ, एवञ्च न प्रथमाभावत्वंस्य द्वितीयाभावत्वघटितत्वं तद्घटकस्य साध्यवद्भेद-निष्ठावच्छेदकताभिन्नावच्छेदकताकत्वाभावस्य प्रथमाभावत्वेऽप्रवेशात् । ततोऽन्यस्यैव साध्यवद्भेदनिष्ठावच्छेदकता भेदसाध्याभावनिष्ठावच्छेदकता भेदोभयवदवच्छेदकतानिरूपकत्वाभावस्य प्रवेशान्न वा सामानाधिकरण्य-मिति वाच्यम् । यतो न वयं साध्यवद्भेदनिष्ठावच्छेदकताभिन्नावच्छेक-त्वनिरूपकत्वघटितद्वितीयधर्माघटितत्वमुपादाय प्रथमधर्मस्य व्याप्यतानव-च्छेदकत्वं ब्रूमः । येन भवदुक्तदोषः स्यात् । परन्तु साध्यवद्भेदनिष्ठावच्छे-दकताभिन्नसाध्यभावनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकत्व साध्य-वद्भेदनिष्ठावच्छेदकतानिरूपकत्वसाध्याभावनिष्ठावच्छेदकतानिरूपकत्व-त्रितयरूपेणाधिकरणनिष्ठावच्छेदकताघटितप्रथमधर्मस्य स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं स्वसमानाधिकरणं च यत् साध्यवद्भेदनिष्ठा-वच्छेदकताभिन्नसाध्याभावनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकसा-ध्यवद्भेदनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकवृत्ति-तात्वावच्छिन्नप्रतियोगिताकाभावत्वं तद्घटितत्वमादायेति न कोऽपि-दोषः इत्यस्मद् गुरुचरणाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साध्यवद्भिन्ने साध्याभाव इति सप्तमीतत्पुरुषमाश्रित्य साध्यवद्भिन्नवृत्तिर्यस्साध्याभावः तद्वद्वृत्तित्वाभावरूपोऽर्थो निष्कर्षितो मथुरानाथेन अत्र साध्याभावस्साध्यतावच्छेदकसंबन्धावच्छिसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः। तेनाव्याप्यवृत्त्यभावस्यैवाधिकरणभेदेन भेदे वह्निमान् धूमादित्यादौ वह्निमद्भिन्ने ह्रदादौ वर्तमानं संयोगेन महानसीयवह्न्यभावं समवायेन वह्निसामान्यभावंचादाय न दोषः। अत्र साध्यतावच्छेदकावच्छिन्नत्वञ्च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तीयावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपितनिरूप्यत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वाश्रय - त्वरूपन्यूनेतरवारकपर्याप्तिघटितं वाच्यम्। तत्र न्यूनवारकपर्याप्तिनिवेशात् वह्निघटान्यतरवान् धूमादित्यादौ साध्यतावच्छेदकघटकघटत्वावच्छिन्नाभावमादाय नाव्याप्तिः। इतरवारकनिवेशाच्च वह्निमान् धूमादित्यादौ महानसीयवह्न्यभाववारणम्। साध्यतावच्छेदकसंबन्धावछिन्नत्वमपि साध्यतानिरूपितसंसर्गतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावछिन्नानुयोगिताकपर्याप्तीयावच्छेदकतात्वावच्छिन्नप्रतियोगिता - निरूपित निरूप्यत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकताकसंसर्गताकत्वरूपं न्यूनेतरवारकपर्याप्तिघटितमेव निर्वाच्यम्। तत्र न्यूनवारकनिवेशात् स्वरूपसंयोगान्यतरसंबन्धेन वह्नेस्साध्यतायां धमादिहेतौ साध्यतानिरूपितसंसर्गतावच्छेदकघटकस्वरूपत्वावच्छिन्नसंसर्गताकस्वरूपेण वह्न्यभावमादायाव्याप्तिवारणम्। इतरवारकप्रवेशाच्च संयोगेन वह्नेः साध्यतायां महानसीयवह्निप्रतियोगिकसंयोगेन वह्न्यभाव वारणम्।

अभावमात्रस्याधिकरणभेदेन भेदोपगमे तु पूर्वोक्तसाध्यतावच्छेदकावच्छिन्नत्वादिव्यावृत्तिस्सङ्गच्छते। परन्तु पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान्जलत्वादित्यत्र साध्यतावच्छेदकघटकद्रव्यत्वाभावत्वावच्छिनाभावं द्रव्यत्वमादायाव्याप्तिवारणम् साध्यतावच्छेदकावच्छिन्नत्वघटकन्यूनवारकपर्याप्तिप्रयोजनम्। पृथिवीत्वाभाववान् जलत्वा दित्यादौ पृथिवीत्वाभावद्रव्यत्वाभावोभयत्वावच्छिन्नाभावं द्रव्यत्वसमनियततया तत्स्वरूप-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मादायाव्याप्तिवारणं तद्घटकेतरवारक प्रयोजनम्। साध्यतावच्छेदक-संबन्धावच्छिन्नत्वघटकन्यूनवारकप्रयोजनञ्च स्वरूपकालिकान्यतरसंबन्धेन द्रव्यत्वाभावसाध्यकघटत्वादिहेतौ साध्यतावच्छेदकसंसर्गतावच्छेदकघटक-स्वरूपत्वावच्छिन्नसंसर्गताकसाध्यतावच्छेदकीभूतद्रव्यत्वभावत्वावच्छिन्ना-भावमादायाव्याप्तिवारणम्। तद्घटकेतरवारकप्रयोजनन्तु कालिकेन द्रव्यत्वाभावसाध्यकघटत्वादिहेतौ गुणानुयोगिककालिकस्वरूपान्यतरसंबन्धा-वच्छिन्नद्रव्यत्वाभावत्वावच्छिन्नाभावं द्रव्यत्वमादायाव्याप्तिवारणम्। भावरूपाभावस्याधिकरणभेदेन भेदाभावादिति ध्येयम्।

तादृशाधिकरणताव्यापकतावच्छेदकं हेतुतावच्छेदकसंबन्धावच्छि-न्नयद्धर्मावच्छिन्नभावत्वं तद्धर्मवत्वस्य विवक्षितत्वात्। व्यापकतावच्छेद-कत्वन्तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वमिति माथुरी। अत्र तादृशाधिकरणतापदं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदका-वच्छिन्नप्रतियोगिताकाभावाधिकरणतापरम्। तथा च तादृशाभावाधि-करणतावन्निष्ठाभावप्रतियोगितानवच्छेदकयद्धर्मावच्छिन्नहेतुतावच्छेदक-संवन्धावच्छिन्नाभावत्वं तद्धर्मावच्छिन्नत्वं व्याप्तिः। यद्धर्मपरं हेतुतावच्छे-दकधर्मपरम्। अथात्र साध्याभाववन्निष्ठत्वं संबन्धसामान्येन स्वरूपसंबन्धेन हेतुतावच्छेदकसंबन्धेन वा विवक्षितम्। आद्ये वह्निमान् धूमादित्यादाव-व्याप्तिः। वह्न्यभाववद्ध्रदादौ धूमाभावत्वावच्छिन्नाभावस्य धूमस्य कालिकेन सत्त्वात्। नापि द्वितीयः धूमवान् वह्नेरित्यादावतिव्याप्तेः। धूमाभाववत्ययोगोलके वह्न्यभावत्वावच्छिन्नाभावस्य वह्नेस्स्वरूपेण-सत्त्वात्। वह्न्यभावत्वस्य व्यापकतावच्छेदकत्वात्। नापि तृतीयः सत्ता-वान् जातेरित्यादावव्याप्तिप्रसङ्गात्। साध्याभाववति सामान्यादौ हेतुता-वच्छेदकसमवायेन वृत्तेरप्रसिद्धेः। न च हेतुतावच्छेदकस्वरूपान्यतरसंबन्धेन साध्याभाववद्वृत्तित्वं विवक्षितम्। तथा च सत्ताभाववत्सामान्यादौ समवायेन वृत्तेरप्रसिद्धावपि निरुक्तान्यतरान्तर्गतस्वरूपेण वृत्तेस्सामान्यादौ प्रसिद्ध्या सत्तावान् जातेरित्यादौ नाव्याप्तिरिति वाच्यम्। तथा सति कालिकसंबन्धेन वाच्यत्वसाध्यककालिकसंबन्धेन ज्ञेयत्वहेतावव्याप्तेः। साध्याभाववति गगनादौ ज्ञेयत्वत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगिताकाभावाभावस्य ज्ञेयत्वस्वरूपस्य हेतुतावच्छेदककालिकेनासत्त्वेऽपि निरुक्तान्यतरान्तर्गतस्वरूपेण सत्त्वादिति चेत्, न। हेतुतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयाभावस्य निरुक्तवृत्तितायां निवेशात्। तथा च वह्न्यभाववद्ध्रदादिनिरूपिता या कालिकसंबन्धावच्छिन्नधूमादिनिष्ठवृत्तिता तस्यां हेतुतावच्छेदकसंबन्धातिरिक्तकालिकसंबन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयसत्वेन तामादाय वह्निमान् धूमादित्यादावव्याप्तिः। सत्तावान् जातेरित्यादावपि सत्ताभाववत्सामान्यादिनिरूपिता या सामान्यत्वादिनिष्ठा स्वरूपसंबन्धावच्छिन्नवृत्तिता तस्यां हेतुनिष्ठत्वाभादेन निरुक्तोभयाभावसत्त्वान्न तादृशवृत्तित्वाप्रसिद्धिः। नन्वेवमपि सत्तावान् प्रमेयादित्यादौ समवायेन हेतावव्याप्तिः। साध्याभाववत्सामान्यादिनिरूपितसामान्यत्वादिनिष्ठवृत्तितायामपि हेतुतावच्छेदकसंबन्धातिरिक्तस्वरूपसंबन्धावच्छिन्नत्वप्रमेयनिष्ठत्वोभयसत्त्वात्। यदि च निरुक्तोभयाभावं विहाय हेतुतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वोभयाभावं निरुक्तवृत्तितायां निवेश्य सत्ताभाववत्सामान्यादिनिरूपितसामान्यत्वत्वाद्यवच्छिन्नवृत्तितायां हेतुतावच्छेदकप्रमेयत्वावच्छिन्नत्वाभावेन उभयाभावसत्त्वात्। न तादृशवृत्तित्वाप्रसिद्ध्या सत्तावान् प्रमेयादित्यादावव्याप्तिः इति भाव्यते तदा वह्निमान्धूमादित्यादावव्याप्तिः। वह्न्यभावद्ध्रदादिनिरूपितद्रव्यत्वावच्छिन्नकालिकसंबन्धावच्छिन्नधूमनिष्ठवृत्तितायां हेतुतावच्छेदकधूमत्वावच्छिन्नत्वाभावेन निरुक्तोभयाभावसत्त्वात् तदाश्रयीभूतो यो धूमाभावः तत्प्रतियोगितावच्छेदकत्वस्यैव धूमाभावत्वे सत्त्वात् इति चेत्, न। हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतासामान्ये साध्याभाववन्निरूपितत्वयद्धर्मावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाभावत्वावच्छिन्नत्वोभयाभावः तद्धर्मावच्छिन्नत्वमव्यभिचरितत्वम्। तथा च वह्न्यभाववद्ध्रादादौ धूमाभावाभावत्वेन धूमस्य संयोगेनावृत्त्या न सा वृत्तिता सामान्यान्तर्गता। किन्तु वह्निमन्निरूपिता धूमादिनिष्ठा। ह्रदादिनिरूपिता जलादिनिष्ठा संयोगसंबन्धावच्छिन्नवृत्तितैव तादृशी। तत्रधूमनिष्ठवृत्तितायां साध्याभाववन्निरूपित्वाभावात्, जलादिनिष्ठवत्तितायां यद्धर्मावच्छिन्नाभावाभावत्वावच्छिन्नत्वाभावादुभयाभावः वर्तत इति लक्षणसङ्गतिः। सत्तावान् जातेरित्यादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मादायाव्याप्तिवारणं तद्धटकेतरवारक प्रयोजनम्। साध्यतावच्छेदक-संबन्धावच्छिन्नत्वघटकन्यूनवारकप्रयोजनञ्च स्वरूपकालिकान्यतरसंबन्धेन द्रव्यत्वाभावसाध्यकघटत्वादिहेतौ साध्यतावच्छेदकसंसर्गतावच्छेदकघटक-स्वरूपत्वावच्छिन्नसंसर्गताकसाध्यतावच्छेदकीभूतद्रव्यत्वभावत्वावच्छिन्ना-भावमादायाव्याप्तिवारणम्। तद्घटकेतरवारकप्रयोजनन्तु कालिकेन द्रव्यत्वाभावसाध्यकघटत्वादिहेतौ गुणानुयोगिककालिकस्वरूपान्यतरसंबन्धा-वच्छिन्नद्रव्यत्वाभावत्वावच्छिन्नाभावं द्रव्यत्वमादायाव्याप्तिवारणम्। भावरूपाभावस्याधिकरणभेदेन भेदाभावादिति ध्येयम्।

तादृशाधिकरणताव्यापकतावच्छेदकं हेतुतावच्छेदकसंबन्धावच्छि-न्नयद्धर्मावच्छिन्नभावत्वं तद्धर्मवत्वस्य विवक्षितत्वात्। व्यापकतावच्छेद-कत्वन्तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वमिति माथुरी। अत्र तादृशाधिकरणतापदं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदका-वच्छिन्नप्रतियोगिताकाभावाधिकरणतापरम्। तथा च तादृशाभावाधि-करणतावन्निष्ठाभावप्रतियोगितानवच्छेदकयद्धर्मावच्छिन्नहेतुतावच्छेदक-संबन्धावच्छिन्नाभावत्वं तद्धर्मावच्छिन्नत्वं व्याप्तिः। यद्धर्मपरं हेतुतावच्छे-दकधर्मपरम्। अथात्र साध्याभाववन्निष्ठत्वं संबन्धसामान्येन स्वरूपसंबन्धेन हेतुतावच्छेदकसंबन्धेन वा विवक्षितम्। आद्ये वह्निमान् धूमादित्यादाव-व्याप्तिः। वह्न्यभाववद्ध्रदादौ धूमाभावत्वावच्छिन्नाभावस्य धूमस्य कालिकेन सत्त्वात्। नापि द्वितीयः धूमवान् वह्नेरित्यादावतिव्याप्तेः। धूमाभाववत्ययोगोलके वह्न्यभावत्वावच्छिन्नाभावस्य वह्नेस्स्वरूपेण-सत्त्वात्। वह्न्यभावत्वस्य व्यापकतावच्छेदकत्वात्। नापि तृतीयः सत्ता-वान् जातेरित्यादावव्याप्तिप्रसङ्गात्। साध्याभाववति सामान्यादौ हेतुता-वच्छेदकसमवायेन वृत्तेरप्रसिद्धेः। न च हेतुतावच्छेदकस्वरूपान्यतरसंबन्धेन साध्याभाववद्वृत्तित्वं विवक्षितम्। तथा च सत्ताभाववत्सामान्यादौ समवायेन वृत्तेरप्रसिद्धावपि निरुक्तान्यतरान्तर्गतस्वरूपेण वृत्तेस्सामान्यादौ प्रसिद्ध्या सत्तावान् जातेरित्यादौ नाव्याप्तिरिति वाच्यम्। तथा सति कालिकसंबन्धेन वाच्यत्वसाध्यककालिकसंबन्धेन ज्ञेयत्वहेतावव्याप्तेः। साध्याभाववति गगनादौ ज्ञेयत्वत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगिताकाभावाभावस्य ज्ञेयत्वस्वरूपस्य हेतुतावच्छेदककालिकेनासत्त्वेऽपि निरुक्तान्यतरान्तर्गतस्वरूपेण सत्त्वादिति चेत्, न। हेतुतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयाभावस्य निरुक्तवृत्तितायां निवेशात्। तथा च वह्न्यभाववद्ध्रदादिनिरूपिता या कालिकसंबन्धावच्छिन्नधूमादिनिष्ठवृत्तिता तस्यां हेतुतावच्छेदकसंबन्धातिरिक्तकालिकसंबन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयसत्वेन तामादाय वह्निमान् धूमादित्यादावव्याप्तिः। सत्तावान् जातेरित्यादावपि सत्ताभाववत्सामान्यादिनिरूपिता या सामान्यत्वादिनिष्ठा स्वरूपसंबन्धावच्छिन्नवृत्तिता तस्यां हेतुनिष्ठत्वाभादेन निरुक्तोभयाभावसत्त्वान्न तादृशवृत्तित्वाप्रसिद्धिः। नन्वेवमपि सत्तावान् प्रमेयादित्यादौ समवायेन हेतावव्याप्तिः। साध्याभाववत्सामान्यादिनिरूपितसामान्यत्वादिनिष्ठवृत्तितायामपि हेतुतावच्छेदकसंबन्धातिरिक्तस्वरूपसंबन्धावच्छिन्नत्वप्रमेयनिष्ठत्वोभयसत्त्वात्। यदि च निरुक्तोभयाभावं विहाय हेतुतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वोभयाभावं निरुक्तवृत्तितायां निवेश्य सत्ताभाववत्सामान्यादिनिरूपितसामान्यत्वत्वाद्यवच्छिन्नवृत्तितायां हेतुतावच्छेदकप्रमेयत्वावच्छिन्नत्वाभावेन उभयाभावसत्त्वात्। न तादृशवृत्तित्वाप्रसिद्ध्या सत्तावान् प्रमेयादित्यादावव्याप्तिः इति भाव्यते तदा वह्निमान्धूमादित्यादावव्याप्तिः। वह्न्यभावद्ध्रदादिनिरूपितद्रव्यत्वावच्छिन्नकालिकसंबन्धावच्छिन्नधूमनिष्ठवृत्तितायां हेतुतावच्छेदकधूमत्वावच्छिन्नत्वाभावेन निरुक्तोभयाभावसत्त्वात् तदाश्रयीभूतो यो धूमाभावः तत्प्रतियोगितावच्छेदकत्वस्यैव धूमाभावत्वे सत्त्वात् इति चेत्, न। हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतासामान्ये साध्याभाववन्निरूपितत्वयद्धर्मावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाभावत्वावच्छिन्नत्वोभयाभावः तद्धर्मावच्छिन्नत्वमव्यभिचरितत्वम्। तथा च वह्न्यभाववद्ध्रादादौ धूमाभावाभावत्वेन धूमस्य संयोगेनावृत्त्या न सा वृत्तिता सामान्यान्तर्गता। किन्तु वह्निमन्निरूपिता धूमादिनिष्ठा। ह्रदादिनिरूपिता जलादिनिष्ठा संयोगसंबन्धावच्छिन्नवृत्तितैव तादृशी। तत्रधूमनिष्ठवृत्तितायां साध्याभाववन्निरूपित्वाभावात्, जलादिनिष्ठवत्तितायां यद्धर्मावच्छिन्नाभावाभावत्वावच्छिन्नत्वाभावादुभयाभावः वर्तत इति लक्षणसङ्गतिः। सत्तावान् जातेरित्यादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्ताभाववत्सामान्यादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धावपि द्रव्यत्वादौ प्रसिद्धया हेतुतावच्छेदकसंबन्धावच्छिन्ना आधेयता तत्र साध्याभाववन्निरूपितत्वाभावादुभयाभावो वर्तत इति लक्षणसमन्वयः। आधेयतासामान्योपादानाच्च पर्वतादिनिरूपिताधेयतायां निरुक्तोभयाभाव-सत्त्वेऽपि अयोगोलकादिनिरूपित वह्न्यभावाभावत्वावाच्छिन्नाधेयतायां निरुक्तोभयाभाबासत्त्वान्नधूमवान्वह्नेरित्यादावतिव्याप्तिः। अस्यायमनु-गमः हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतावृत्त्यत्यन्ताभावीयोभयावृत्तिधर्मे-तरधर्मानवच्छिन्नप्रतियोगिताशून्यः यस्साध्याभाववन्निरूपितत्वकिञ्चिद्रूपा-वच्छिन्नप्रतियोगितानिरूपितानुयोगित्वावच्छिन्नप्रतियोगितानिरूपितानु - योगित्वावच्छिन्नत्वोभयं नास्तीति प्रतीतिसिद्धाभावः तन्निरूपिता या साध्याभावनिष्ठावच्छेदकतानिरूपिताधिकरणतानिष्ठावच्छेदकतानिरूपिता सती निरूपितत्वनिष्ठावच्छेदकतानिरूपिका सती उभयत्वनिष्ठावच्छेदकता-निरूपिका सती या निरूपकतात्वनिष्ठावच्छेदकतानिरूपितप्रतियोगिता तन्निरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितानुयोगित्वनिष्ठावच्छेदक - तानिरूपितप्रतियोगितानिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेद - कतानिरूपितानुयोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावद्धेतुतावच्छेद-कवत्वमिति।

वस्तुतस्तु यद्धर्मावच्छिन्नाभावत्वमित्यनेन यद्धर्मावच्छिन्नाधेयता-निरूपिताधिकरणतात्वावच्छिन्नप्रतियोगिताकाभावत्वं विवक्षितम्। तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधेयतानिरूपिताधि-करणतात्वावच्छिन्नप्रतियोगिताकाभावत्वं साध्याभावाधिकरणताव्याप-कतावच्छेदकं तद्धर्मावच्छिन्नत्वं लक्षणम्। अत्र व्यापकताघटकवृत्तित्वं स्वरूपेण विवक्षणीयम्। तावतापि धूमाभावाधिकरणेऽयोगोलके वह्न्-यधिकरणतास्वरूपस्य वह्न्यधिकरणत्वाभावाभावस्य स्वरूपेण सत्त्वात्। वह्न्यधिकरणत्वाभावत्वस्य व्याकतावच्छेदकत्वाभावेन धूमवान् वह्ने-रित्यादावतिव्याप्तेरभावात्। इत्थञ्च सत्ताभाववति सामान्यादौ स्वरूपेण-वृत्तिताप्रसिद्ध्या न सत्तावान् जातेरित्यादावव्याप्तिरिति ध्येयम्। माथुरी-पञ्चलक्षण्युपरि सङ्गमेश्वरीयं समाप्तिमगमत्॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं प्रयागे विलुप्ता सरस्वती ?

सिन्धु सरस्वती गंगा प्रभृति भारतीय नद्यः पुरातन संस्कृतेः सभ्यतायाश्च संपोषिकाः सन्ति। भारतीय संस्कृते मूलाधारे सरस्वत्याः महन्महत्त्वं वैदिककाले आसीत्। सैव साम्प्रतं विलुप्ताऽस्ति। सरस्वतीविलोप विषये विविधा अवधारणा विचारणीयासन्ति। सा प्रयागे विलुप्ताऽन्यस्मिन् क्षेत्रे वा ? अस्याः प्रवाहपरिवर्तनस्य विलोपस्य वा कानि कारणानि समुपस्थितानि ? इति विचार्यतेऽस्मिन्शोधपत्रे।

प्रकृष्टो यागो यागफलं यस्य यस्मात् वा तद् प्रयागं प्रसिद्ध तीर्थस्थलं प्राचीन साहित्ये प्रथितमेव। सामान्यतः सरितां संगमस्थलं संज्ञायते प्रयागाभिधानेन। साम्प्रतमपि बहूनि प्रयागस्थलानि प्रसिद्धानि पुरातनेऽस्माकमार्यावर्त्ते—देवप्रयागकर्णप्रयागरुद्रप्रयागादीनि, किन्त्वेतेषु प्रयागेषु गंगायमुना सरस्वतीनदीत्रयसंगमः 'त्रिवेणीति' प्रयागमिलाहाबादं वा विख्यातं विश्वस्मिन्।

आधुनिके प्रयागे गंगायमुनयोरेव संगमः संदृश्यते, सरस्वती तु विलुप्तैव। प्राकृतिकप्रवाह सम्बन्धि शोधदृष्ट्या सरस्वत्याः स्वरूपावधारणं सर्वथा समीचीनमेव। ऋग्वेदे सरस्वती सम्बन्धिता अनेका ऋचः सम्प्राप्यन्ते आभिरस्याः तात्कालिक महत्त्वं सुस्पष्टमेव प्रतिभाति। वर्तमानकाले यन्महत्त्वं गंगायै प्राप्तमस्ति वैदिककाले तदेव महत्त्वं सरस्वत्यै[1] प्राप्तमासीत्। ऋग्वेदस्य अनेकैः सन्दर्भैर्ज्ञायते, यदियं सप्तधाराभिः दृषद्वतो

---

१. ऋक्० २।४१।१६ अम्बितमे नदीतमे देवितमे सरस्वति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आपया, गुङ्गू, राका, सुनीता, क्षरा, सिनीवालीति सप्तसहायकनदीभिः समं सवेगं प्रवहन्ती समुद्रं संगच्छते स्म—

"सरस्वती सप्तथी सिन्धुमाता।" ऋग्वेदे ७।३६।६)

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। (ऋग्वेदे ६।६१।१०)

परवर्तिवैदिक साहित्येऽपि परिवर्तितसरस्वत्याः स्वरूपसम्बन्धिता अनेके सन्दर्भाः सम्प्राप्यन्ते। ताण्ड्य ब्राह्मणे (२५।१०।१,१६) अस्याः **विनशनस्य**, जैमिनिब्राह्मणे (२।२९७) **प्लक्षप्रास्त्रवणस्य** (उन्मज्जनस्य वा) तथ्यं प्रकटितमस्ति सूत्रग्रन्थेष्वपि सरस्वत्या उल्लेखः प्राप्यते। कात्यायन श्रौतसूत्र (१२।३।२०,२४।६।२२) लाट्यायन श्रौतसूत्र (१०।१५।१,१८।१३,१९।४), आश्वलायनश्रौतसूत्र (१२।६।२,३) सांख्यायन श्रौतसूत्र (१३।२९)—प्रभृति सूत्रग्रन्थेषु रामायण महाभारतादिकाव्यसाहित्ये चाऽस्यास्तटयोः सम्पन्नयागानां महत्ता, जलस्य पावनता च वैदिकसन्दर्भ-पुष्ट्या प्रतिपादिता। यथा—रामायणेऽयोध्याकाण्डेऽवस्थितिरस्याः उ० प० यात्रामार्गे एवमभिव्यक्ताऽस्ति—

सरस्वतीं च गंगां च युग्मेन प्रतिपाद्य च।
उत्तरान् वीरमत्स्यानां भारुण्डं प्राविशद्वनम्॥

(अयोध्या० ७१।५)

किष्किन्धाकाण्डेऽपि उत्तरापथस्य नदीनां गणनायां सरस्वती एवं वर्णिताऽस्ति वाल्मीकिना—"सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम्।"

(किष्किन्धा ४०।२१

महाभारते सरस्वत्याः उद्गमक्षेत्रीयप्रवाहेऽसामन्यपरिवर्तनस्य एवमुल्लेखो विद्यते—

"ततो विनशनं गच्छेन्नियतो नियताशनः।
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती॥(महा०, वन० ८३/१११)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवाहे प्राकट्यमस्या एवं वर्णितवान् वेदव्यासः त्रिषु स्थलेषु महाभारते—

"चमसेऽथ शिवोद्भेदे नागोद्भेदे च दृश्यते।
स्नात्वा तु चमसोद्भेदे अग्निष्टोमफलं लभेत्॥"

(वन० ८३/११२)

प्रसिद्धगणितज्ञः भास्कराचार्योऽपि स्वग्रन्थे सिद्धान्तशिरोमणौ तथ्यमिमं समर्थयति।

सरस्वती शिवालिक-हिमालयस्य सिरमूरश्रेणीभ्यः (अम्बाला-जनपद समीपाद्) निर्गत्य दक्षिणे शुतुद्रियमुनयोर्मध्ये प्रवहन्ती अद्रबद्री-समीपे समतलक्षेत्रेऽवतरति। भवानी बालप्परयोः समीपमस्याः प्रवाहः सैकते क्षत्रे विलुप्तो भवति, किन्तु बरखेडानिकट इयं पुनः प्रादुर्भवति। विहोआ समीपे उरनई स्थाने मार्कण्डा नद्या सहाऽस्याः संगमो भवति। पुनश्च पटियालक्षेत्रे रसूलसमीपे संयुक्तधारया इयं छर्छरं छग्घरं वा संगच्छते। यतः नदीयं 'हकरा' 'सोतार' वाभिधानं दधाति। राजस्थाने बीकानेरक्षेत्रे हनुमानगढे पुनरियं बालुकायां विलुप्ता भवति।

सरस्वत्याः शुष्कं प्राचीनप्रवाहक्षेत्रं बीकानेरसमीपे शताधिकमीटरान्तराले पञ्चकिलोमीटर विस्तृतं वर्तते, यं पूर्वोत्तराभिमुखे यमुना-पर्यन्तं यमुनयाऽस्याः प्रवाहापकर्षणस्य परिकल्पना कर्त्तुं शक्यते। सम्भाव्यते यमुनाप्रवाहः सरस्वत्याः प्रवाहः (अस्याः काचिद् शाखा वा) नैकट्यान्मिलितौ स्याताम्। डॉ० एम० एन० कृष्णन् प्रभृतिभौगोलिकानामियमेवावधारणा विद्यते सरस्वतीविलोप विषये। सी० एफ० ओल्डहम, डी० एन० वाडिया, एफ० अहमद, गुरुदेवसिंह, वी० एस० वाकणकरप्रभृति भूगर्भशास्त्रिपुरातत्त्वविद्भिः सरस्वत्याः प्राचीनप्रवाहे परिवर्तनविषयक विचारः प्रकटितोऽस्ति। यस्य सम्यग्रूपेणाकलनं श्री गुणाकर मुलेमहोदयेन कृतमेव।

अस्मिन् सन्दर्भे पुरातन भूगोलज्ञानां विचारोऽस्ति यत् शुतुद्रि (सतलज) नदी सरस्वत्याः (हकरा, सोतार नद्याः वा) अधिकांशं जलमप-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हृतवती, यतः भौगर्भिकैतिहासिक तथ्यानि शुतुद्रि पञ्चनदक्षत्रस्य नदीं ईसातः द्वादश शताब्दाधिकं न प्रमाणीकुर्वन्ति । छर्छरसंयुक्तेयं लोकभाषायामद्यापि 'सुरसुति' नाम्ना सत्यमेवाभिज्ञायते स्थानिजनैः ।

सरस्वत्याः प्रयागेऽन्यप्रवाहक्षेत्रे वा विलोप-विषये भौगर्भिक कारकानां प्रभावोऽपि ध्यातव्योऽस्ति । यतः अस्या उद्गम क्षेत्रे हिमालये, यतः मूलत इयं जलं गृह्णाति स्म, प्रभूतं परिवर्तनं बभूव । हिमालयः हिम युगात् (Pleistocene प्लीस्टोसीन युगात्) सततं उत्तिष्ठन्नस्ति। अतोऽस्य शिवालिकश्रेणीषु भौगर्भिक परिवर्तनैः आसामुत्तुंगत्वात् सरस्वत्याः मूलं जलस्रोतो विच्छिन्नमभविष्यत्[1] । सरस्वती स्व प्राचीन प्रवाहेण सप्तसहस्रवर्गमील क्षेत्रमभिसिञ्चितवती, यदधुना मरुस्थले परिणतमस्ति । कदाचित् इयं नदी उत्तरवैदिक काले स्वकीयप्राकृतप्रवाहे परिवर्तनं प्राप्य ईदृशी विलुप्ताऽभवत्, यत् परवर्तिरामायण महाभारतादिग्रन्थेस्वस्याः कुत्राऽपि उल्लेखः प्रयागे संगमस्थले न प्राप्यते । यथा रामायणे भरद्वाजाश्रमस्थिति सन्दर्भे—

"यत्र भागीरथीं गंगां यमुनाऽभिप्रवर्तते ।
जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनम् ।।

"प्रयागमभितः पश्य सौमित्रे धूममुत्तमम् ।
गंगायमुनयोः सन्धिमासाद्य मनुजर्षभौ ।।

(अयोध्या ५४।२, ४)

रामस्य लङ्कातोऽयोध्याप्रत्यागमनमार्गे संगमदृश्यवर्णने सरस्वत्या अविद्यमानता युद्धकाण्डेऽपि प्राप्यते यथा—

१. द्रष्टव्यम्—Geology of India and Burma, Madras, १९५५, P. २६.

२. "ऋग्वेद की नदीतमा सरस्वती" शीर्षक लेखः, 'दैनिक आज' २६ जुलाई, १९८६ । (लेखकः, गुणाकर मुले)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"गंगायमुनयोर्भीमं समतीत्य समागमम् ।"

(रामा. युद्ध. १२५।२१)

एषा सा यमुना रम्या दृश्यते चित्र कानना ।
भरद्वाजाश्रमः श्रीमान् दृश्यते चैष मैथिलि ।।
इयं च दृश्यते गङ्गा पुण्या त्रिपथगा नदी ।"

(युद्धकाण्डे १२३।५२-५३)

महाभारते प्रसिद्ध तीर्थगणनायां प्रयागे संगमोल्लेखे सरस्वत्या अविद्यमानता एवं प्राप्यते वनपर्वणि—

यमुनागंगया सार्धं संगता लोक पावनी ।
गंगा यमुनयोर्मध्यं पृथिव्या जघनं स्मृतम् ।
प्रयागं जघनस्थानमुपस्थमृषयो विदुः ।।
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरौ तथा ।।"

(महा. वन. ८५।७५, ७६)

कविकुलगुरुः कालिदासोऽपि रामायणमनुसृत्य, प्रयागे संगमवर्णने सरस्वतीं विलुप्तामेव मनुते । यथा रघुवंशे त्रयोदशसर्गे—"पश्यानवद्याङ्गिविभाति गंगा भिन्नप्रवाहा यमुनातरंगैः ।
समुद्रपत्न्योर्द्वयसंन्निपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनाऽपि भूयस्तनुत्यजां नास्ति शरीरबन्धः ।।

(रघु. त्रयोदश सर्गः)

प्रतीयते, प्रयागे सरस्वत्याः प्रवाहे विलुप्ते सत्यपि 'त्रिवेणी' रूपेणऽस्याः लोकेऽस्मिन् विद्यमानता कालिदासप्रभृतिपरवर्ति कविभिः कविसमयमाश्रित्य 'अन्तः सलिला' नदीव प्रतिपादिता । यथा रघुवंशे तृतीय सर्गे—

"नदीमिवान्तः सलिलां सरस्वतीम्"' इति ।"

(रघु. ३।९)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतः कथयितुं शक्यते यत् बाह्य भौतिक रूपे प्रयागे सरस्वत्याः विलोपेऽपि 'अन्तः सलिला' नदीयमधिष्ठातृज्ञानदेवी प्रतीकेन ज्ञानधारया प्रयागं सततमाप्लावितं करोति, यतोऽत्र नैके सरस्वती सूनवः स्वकीय साहित्यरससोतसा सदैव सहृदयहृदय' वल्लरीमभिसिञ्चन्ति ।[1] इति शम्

१. आकाशवाण्याः लक्ष्मणपुरकेन्द्रेण ७।५।८६ दिनाङ्ककृतकार्यक्रमे प्रसारितायाः लेखकस्य वार्तायाएकस्या आधारेण प्रस्तुतोऽयं शोधलेखः (विस्तृताध्ययनार्थं द्रष्टव्यः लेखकस्य शोधग्रन्थः" सप्तसैन्धव प्रदेशः "ऋग्वैदिक भूगोल", साहित्यनिकेतनम्, कर्णपुरे, १९८५ वर्षे प्रकाशितः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ON THE INTERDEPENDENCE OF ITIVṚTTA AND RASA

—DR. (MRS.) M.V. RAMANA

Rasa reigns supreme in the realm of any literary composition, i.e., Kāvya, and all the other paraphernalia in a Kāvya are more or less directed to this end. Due to this reason, Rasa is given the highest rank of being the soul of Kāvya and Itivṛtta or Vastu (i. e., Plot) is said to constitute the body. Bharata adopts the popular analogy between Kāvya and the human body and points out the significance of the Sandhyaṅgas (i.e., the Aṅgas of the Sandhis) as that of the limbs of the body.

> Aṅgahino naro Yadvannaivārambhakṣamo bhavet,
> Aṅgahīnam tathā kāvyam na prayogakṣamam bhavet.[1]

Itivṛtta, being the body of Kāvya, is thus secondary and subserves the interests of Rasa. The term 'Itivṛtta', refers primarily to the structural elements contributing to the development of plot, viz., Sandhis and their Aṅgas. Similarly, the term 'Rasa' refers to the aesthetic ingredients like the Vibhāvas the Anubhāvas and so on. The interdepedence of Itivṛtta and Rasa, therefore, implies the relation between the Sandhyaṅgas and the aesthetic ingredients, viz., the Vibhāvas, the Anubhāvas and the Vyabhicāribhāvas.

Itivṛtta and Rasa are inseparable and one is involved in the other. There is no narrative that does not evoke Rasa. All accounts of incidents and objects in this world invariably become resources of some sentiment or mood, and thus they become a constituent factor of Rasa—realisation. In the least, they form the Vibhāvas, either Ālambana or Uddīpana.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Na hi rasaśūnyam vastu kimcidasti......,
Vastu ca sarvameva Jagadgatamavaśyam kasyacid
rasasya bhāvasya'vā aṅgatām pratipādyate, antato
vibhāvatvena.[2]

And also,

Cittavṛttiviśeṣā hi rasādayaḥ, na ca tadasti vastu
kimcid yanna cittavṛttiviśeṣamupajanayati.[3]

Dhanañjaya, however, beautifully sums up this idea in the following verse :

Ramyam jugupsitamudāramathāpi nīcam
Ugram prāsādi gahanam vikṛtam ca vastu,
Yadvāpyavastu kavibhāvakabhāvyamānam
Tannāsti yanna rasabhāvamupaiti loke.[4]

Therefore, it is difficult to isolate the one from the other. Itivṛtta is the abode or substratum of Rasa. The evaluation of the structural theory of Sandhis and Sandhyaṅgas, from the aesthetic point of view, received much attention at the hands of literary theorists. In the text of Nāṭyaśāstra itself, there are several passages emphasizing the use of various Aṅgas so as to be in harmony with Rasa-delineation. The very purpose of the Sandhyaṅgas is given by Bharata as 'Iṣṭasyārthasya racanā'. Here the term 'Artha' refers to Rasas only.

cf. Abhīṣṭasya prayojanasya rasāsvādakṛto racanā vistāraṇā.[5]

After enumerating the Sandhyaṅgas, Bharata says that they should be employed by the poet with due regard to the Rasa that is delineated.

......Kartavyānyetānyangāni nāṭake kavibhiḥ
kāvyakuśalaiḥrasabhāvamapekṣya tu.[6]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Most of the Ālamkārikas, emphasized Rasa as the primary purport, of the Sandhyaṅgas. The statement of Ānandavardhana—'Sandhi-sandhyanga ghaṭanā rasābhivyaktyapekṣayā......', sums up this idea. Realising this, Bhoja says that the poet should make use of the Sandhyaṅgas, only in view of the Rasa at hand, and also the literary genre chosen.

Tasmāt sandhiprayogeṣu *yathākāvyam yath—arasam,*
kāryāṅyaṅgani.[7]

Following the foot-steps of these writers, the later critics like Sāradātanaya, Singabhūpāla and Viśvanātha emphasise the use of Sandhyaṅgas from the aesthetic point of view.

Abhinavagupta, however, throws light on some of the vital issues that are connected with this problem, viz. the interdependence of Itivṛtta and Rasa. He poses the question—how can the Sandhyaṇgas, which are the parts of the Sandhis, be subservient to Rasa,—

Nanu sandhiparatantrair aṅgair bhavitavyam,
tad rasa pāratantryameṣām kutastyam ?[8]

and explains thus—The Sandhyaṇgas, nevertheless, form the parts of the Sandhis, and Sandhis are the structural divisions of the plot revealing the undercurrent of Avasthas. Avasthas themselves represent the stages involved in the development of a particular action, leading to the achievement of the object. The achievement of the object ultimately tends to Rasa; because the undertakings and pursuits (of the Nāyaka) during the course of action are nothing but in the form of Vibhāvas Anubhāvas and the like from the aesthetic point of view. Thus the Sandhyaṇgas have a vital role in the development of Rasa.

Sandhayo 'hyavasthāparatantrāh......avasthā
apyanukṛtiviśeṣamanūcyante......rasabhāvāpekṣayā
tu kāryam sthitam, tasyāpekṣayā avasthānam jñātveti,
kāryampi rasaprāvāhajananaparyantatvena kṛtārthatām
sampadyate iti yāvat.[9]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'Although as such this interdependence of Itivṛtta and Rasa is self-evident and its existence was in general terms acknowledged repeatedly, yet the mutations of the aesthetic experience in harmony with the development of Itivṛtta, seemed to be allowed to pass largely unnoted'.[10]. But it is to the singular credit of Abhinavagupta who gave practical illustrations for some of the Sandhyaṅgas as contributing to the delineation of Rasa. Very often, the illustrations are from the play, Veṇīsaṃhāra. For instance,

1. The Aṅga—'Yukti', employed in both the Mukha—and the Garbha Sandhis nourishes the Vyabhicāribhāva, viz., Vitarka.
2. The Anga——Upakṣepa, in the verse, 'Lākṣāgṛhānala......' serves as the Vibhāva in developing Vīra and Raudra Rasas.
3. In the verse——'Pravṛddham yadvairam......', the Aṇga Parikara displays Krodha—the Vyabhicāribhāva in Vīra Rasa, and the Sthāyibhāva for Raudra Rasa.
4. Similarly, in the verse—— 'Cañcadbhujabhramita......' the Aṇga——Parinyāsa, enriches the depiction of Anubhāvas.

In a like manner, the Aṇga——Vilobhana, is explained as revealing the Anubhāva and the Vyabhicāribhāvas. The difference between a Sandhyaṇga and Vibhāva, to put in the apt words of Dr. C. M. Byrski, 'is similar to the one which exists between the written scenario of a given situation and a still picture of the same situation'.[11] Further, Dr. Byrski gives illustrations as to how some of the Aṇgas, being in the form of Vyabhicāribhāvas, contribute to the development of Rasa.[12]

The Nāṭyadarpaṇa (of Rāmacandra and Guṇacandra) borrows much of the discussion from Abhinavagupta. But the treatment of the position of some of the Sandhyaṇgs and their role in developing Rasa are more clear and convincing. The Nāṭyadarpaṇa explicitly says that whatever Rasa is introduced in the Mukha Sandhi, the same is to be developed by its Sthāyi—, Vibhāvas etc., in the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Pratimukha Sandhi. If Sṛṅgāra is depicted as the Aṇgi-Rasa in the Mukha Sandhi, it should be developed further in the pratimukha Sandhi through the Aṇgas like Vilāsa and also other Aṇgas that enrich Sṛṅgāra.[13] In the works having 'Vīra' Rasa as the prevalent Rasa, then Vilāsa stands for 'Utsāha' Sthāyibhāva. The Nāṭyadarpaṇa once again sums up the prime motive of the Sandhyaṅgas as contributing to the delineation of Rasa :

Sarvasandhīnām ca angāni itivṛttāvicchedārtha-

mupādīyante, Itivṛttasyāvicchedaḥ rasapuṣṭyarthaḥ,

vicchede hi sthāyyādeḥ truṭitatvāt kutastyo rasāsvādaḥ.

Tato rasābhidhānaikacetasaḥ kaveḥ prayatnāntarā-

napekṣam yadaṅgamujjṛmbhate tadevopanibaddham

sahṛdayānām hṛdayamānandayati-[14]

After enumerating the Sandhyaṇgas also, the Nāṭyadarpana concludes that they are in the form of Sthāyi, Vibhāva, Anubhāva and the Vyabhicāribhāvas.

cf. Angāni ca sthāyivibhāvānubhāvavyabhicārirupāni.[15]

Thus it is the parallel development or the harmonious blending of the elements of plot and the emotional situations that results in the paramount aesthetic appeal of a piece of art as a whole.

REFERENCES

1. Nāṭyaśāstra : G. O. S. edn. (with the comm. Abhinavabhāratī) XXXVI, Vol. III ed. G.H. Bhatt, (Baroda, 1956) Ch. XIX—53.

2. Dhvanyāloka : with the comm. 'Locana' of Abhinavagupta, ed. Jagannatha Pathak, (Vidyabhavan Samskrtagranthamala—97) p. 526.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

3. Idem.,
4. Daśarūpaka : IV—85
5. Abhinavabhārati : op. cit., p. 32
6. Nāṭyaśāstra : XIX. 104.5
7. Sṛṅgāraprakāsa : ed. G.R. Josyer (Mysore) Vol. II. p. 504
8. Abhinavabhārati : p. 62
9. Idem.
10. Byrski, C.M. : 'Concept of Ancient Indian Theatre' (Delhi, 1974), vide Foot Note 2, p. 147.
11. Ibid.
12. Ibid. p. p. 148; and Foot Note 3, pp 147-8.
13. Nātyadarpaṇa : ed., Nagendra (Delhi, 1961) p. 126.
14. Ibid., p. 196.
15. Idem.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

TRIVARGA AND KĀLIDĀSA

—Dr. S.R. IVATURI.

1.0 The Āryan society framed the laws of life in such a way that all the energies of the individual would be spent towards his evolution into the higher planes, with his physical, vital and mental bodies cooperating well tuned with the Nature in all stages of his life, such as childhood, youth and etc., and in all fields such as personal, familial and etc. It recognised that four are the factors upon which depend the journey of a man into the higher planes.

These are 1. the duties to be performed, 2. the economic position, 3. the desires to be fulfilled and 4. the final liberation.

These are called the Dharma, Artha, Kāma and Mokṣa respectively and are known as the Puruṣārthas, the four ends of human life.

धर्मार्थं काममोक्षाश्च पुरुषार्था उदाहृताः ।[1]

Of these, the first three, i.e. Dharma, Artha and Kāma are called Trivarga and when Mokṣa is included, they are Caturvarga.

त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकः ।[2]

---

1. Viṣṇupurāṇa I 18 21
2. Amarakośa II 457

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

2.0 *The Problem of Trivarga* : There has always been a discussion about the predominance of one or the other Puruṣārthas with reference to another. But, this discussion is mainly restricted to the Trivarga of Dharma, Artha and Kāma, with Mokṣa being accepted by one and all as the highest goal or the Atyanta-puruṣārtha.

तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ।[3]

2.1 Manu refers to the different opinions of the Ācāryas in his Manusmṛti regarding the problem of the predominance of one of the three Puruṣārthas over the others. He observes that opinions differ in this respect with some saying that Dharma and Artha are superior, some perferring Kāma and Artha; some more holding that Dharma is better and some others opting for Artha. And his stand is that all the three are equally important.

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयः त्रिवर्ग इति तु स्थितिः ॥[४]

The Mahābhārata records an interesting discussion among the five Pāṇḍava brothers and Vidura about this topic where each one prefers a different Puruṣārtha.[5]

Vālmīki advises that one shall not forego one Puruṣārtha for the sake of another, but one shall equally strive for the three.

कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः ।
उभौ वा प्रीतिलोभेन कामेन न विबाधसे ॥
कच्चिदर्थं च कामं च धर्मं च जयतां वर ।
विभज्य काले कालज्ञ सर्वान् वरद सेवसे ॥[६]

---

3. Bhāgavata IV 22 35
4. Manusmṛti II 224
5. Mahābharata, Vavilla edition, XII 146
6. Rāmāyaṇa II 100 62, 63

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

But, Kauṭilya, in his Arthaśāstra, opines that Artha is more important because both Dharma and Kāma have their source in Artha.

अर्थ एव प्रधानः इति कौटिल्यः । अर्थमूलौ हि धर्मकामाविति ।७

Vātsyāyana, accepting that Dharma is superior to Artha and Artha to Kāma, however, maintains that according to the position of a man in a society, one or the other Puruṣārtha gets preference over the rest for that individual. Thus, a king must give preference to Artha and a courtesan shall pursue Kāma as the principal object.[8]

2.2 But, though Artha and Kāma are important, they must not be bereft of Dharma, Otherwise. they shall be abandoned, says Manu.

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।८

This opinion, it can be said is accepted by one and all. Thus, in a way, Dharma is generally accepted as the superior one among the Trivarga. Vyāsa echoes the same when he says,

धर्मे चार्थे च कामे च धर्म एवोत्तरो भवेत् ।१०

or when he asks with feeling why Dharma, the cause of Artha and Kāma is not being pursued by man.

धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते ।11

3.0 *Kalidasā on Trivarga* : Kālidāsa, the greatest of the classical Saṅskṛt poets, accepts that Mokṣa is the highest goal a man tries to attain. So he makes Duṣyanta say in the Bharatavākyam of Śākuntala——

7. Arthaśāstra I iii 7
8. Kāmasūtra I ii 14-17
9. Manu. IV 176
10. Mahabharat (V) XII 84 90
11. Ibid XVIII 5 49

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥[१२]

And, Kālidāsa regards Dharma to be the essence of Trivarga. This is clearly reflected in the words of Siva who visits Pārvati while the latter is performing penance with her mind withdrawn from the attractions of Artha and Kāma.

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि !
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥[१३]

But, this does not mean that only Dharma shall be followed disregarding the other two. Kālidāsa says that neither Dharma shall be forsaken for the cause of Artha and Kāma, nor those two for the sake of Dharma, nor Artha for Kāma and nor kāma for Artha. But one must be equal in all these three goals.

न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थं कामेन वा सोऽर्थेन सदृशस्त्रिषु ॥[१४]

Here, he reiterates the teaching of Vālmīki. And he gives the example of Rāma, whose approach to the Trivarga can be compared with his treatment of his brothers.

धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम् ।[१५]

But, Kālidāsa opines that Artha and Kāma shall follow Dharma like the disciples their Guru. This is the picture he presents of Viśvāmitra, the Guru and Rāma and Lakṣmaṇa, the disciples.

---

12. Śākuntala VII 35
13. Kumārasambhava V 38
14. Raghuvamsa XVII 57
15. Ibid XIV 21
16. Ibid XI 35

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथकामसहितं सपर्यया देहबद्धमिब धर्ममभ्यगात् ।[16]

When this principle is understood, Artha and Kāma become but Dharma as in the case of Dilīpa.

अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिण: ।[17]

And Kālidāsa compares the four sons of Daśaratha with the four Puruṣārthas suggesting that just as the sons are part of one entity, as also the Puruṣārthas are but the four expressions of the single path.

धर्मार्थकाममोक्षाणामवतार इवाङ्गवान् ।[18]

Thus it can be seen how Kālidāsa follows the teachings of the Smṛtis and Itihāsas and presents Dharma as the essence of Trivarga. Next to Dharma he presents Kāma in all its detail and emphatically says that it shall follow Dharma only. A study of the Puruṣārthas of the Kāvyas of Kālidāsa reveals that he treats Dharma and Kāma more comprehensively when compared to Artha. And Mokṣa always remains in the background only. Thus, Raghuvamsa, though a treatise on all the four Puruṣārthas, teaches Dharma in particular. And Kumārasambhava shows how Kāma must follow Dharma. Śākuntala again has Dharma and Kāma as its Puruṣārthas or rather it has Dharmakāma as its Puruṣārtha. The other two dramas, Mālavikāgnimtra and Vikramorvaśiya have Kāma as their Puruṣartha. So also Meghadūta and Rtusamhāra.

17. Ibid I 25
18. Ibid X 84

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

AŚMAKEŚVARA ŚARABHA OF BĀNA AN APPRAISAL[1]

By

Dr. Sudarshan Kumar Sharma[2]

Bāṇa's Harṣacarita Ucchvāsa VI is a veritable quarry of valuable information on the events of Ancient past. The present paper is intended to dilate upon one such event that resulted in the decapitation of 'SARABHA' at the hands of the spies of an enemy, who having assumed the garb of musicians took into confidence this over-lord of Aśmaka and perpetrated this treacherous deed with the help of sharp poniards concealed within the frame work of lute gourds, fond as he was of the instrument of music (lute)[3]

---

1. Paper presented at the 31st All India Oriental Conference Jaipur October 29-31, 1982.
2. Senior Lecturer in Sanskrit Rajindra Govt. College Bhatinda (Panjab)151001.
3. Priya-tantrī-Vādyasya alabū (u) Vīṇābhyantars-susiranihita, tara-vārayo gāndharvacchātracchadmānah Cicchi-ḍuraś-makes-varasya Sarabhasya śiro ripupuruṣāh. HC Cal-ed P. 692·LL 1-3 Bombay ed (Dr. P.V. Kane) P. 50 LL 25-26.
   Sarabha, the Aśmaka King, being attached to string music his enemy's emissaries disguised as students of music cut off his head with sharp knives hidden in the space between the Vīnā and its gourd. HC English translation pp 192-93 E.B. Cowell and F.W. Thomas.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Before identifying 'Saraba' let us define the domain of 'Aśmaka - country where he reigned supreme before the time of Bāṇa (i.e. Harṣavardhana 606-648 A.D.), The Geographical Encyclopaedia of Ancient and medieval India[4] defines it as under ;

"Aśmaka (Assaka) : Two kingdoms are known by this name. The Kūrma Purāṇa mentions it along with the countries of the Panjab. The Bṛhatsaṃhitā (Ch XIV) places Aśmaka in the North-West of India. From the histroy of Bāvati narrated in Suttanipāta (V. 977) and Pārāyaṇavagga (S.B.E.X. 188) it appears that Assaka (Aśmaka) was situated between the Godāvāri and Māhiṣsati (Māhiṣmatī) on the Narmada.

It became a part of Mahārāṣṭra country at the time of Aśoka. This Daśakumāra-Carita of Daṇḍin (6th Century A.D.) describes it as a dependent Kingdom of Vidarbha. It is also mentioned in the Harṣa-carita. Bhaṭṭa Svāmī the Commentator of Kauṭiliyamartha-Sāstraṃ identifies Aśmaka with Mahārāṣṭra.

Pāṇinī refers to the pair names (Āvantyaśmakāh) (VI2.12) which proves the Asmaka was situated by the side of Avanti (Modern Malwa). Rhys Davids points out that Aśmaka was situated immediately North West of Avanti. The settlement on the Godāvari according to him, was a later Colony (B.I. pp 27-28). Āsaṇga in his Sutrālaṃkāra mentions an Aśmaka country in the basin of the Indus (H.G. I. p. 142).

Potana or Potali, the Paudanya of the Mahābhārata (I-77.47) was the capital city of the Aśmakas. It was once included in the Kingdom of Kāsī. The Assaka Jātaka (J-11. 155) mentions a King named Assaka who reigned in Potali which is referred to in it as a city of Kāśī Kingdom".

---

4. Chief Editor Prof. K.D. Bajpai aided by Dr. K.A. Nilakaṇṭha Shāstrī, Dr. V.V. Mirashi, Dr. R.N. Dāṇḍekar, Dr. B. Chhabra, Dr. B.C. Law and Dr. Rajbali Pāṇḍeya Part. I

